नं० ४७५२ - घ

विश्वामित्र कल्पे नित्यनै -
- मित्तादि गायत्री
पुरश्चरण विधानम्
पत्राणि १०४

नं० ४७५२-घ

नित्यनैमित्तिकादिगायत्रीपुरश्चरणविधानम्

विश्वामित्रकल्पे

4752

नं० ४७५२-घ

पत्राणि १०८

F. = 104

नं० ४७५२-घ

विश्वामित्रकल्पे नित्यनैमित्तादिगायत्री-

पुरश्चरणविधानम् पत्राणि १०८

गोवर्द्धन[illegible] नं० ४०५२

ॐस्वस्तिश्रीगणेशायनमः अथनित्यविधिः॥ स्नानसन्ध्यायकर्त्तव्यंयद्द्विजेनदिने
दिने तदहंसंप्रवक्ष्यामिद्विजानामुपकारकं १ उदयास्तमयोयावद्द्विजः॥
सत्कर्मकृद्भवेत् नित्यनैमित्तिकैर्युक्तकाम्यैश्चान्यैश्चरोहितः २ आत्मैवतस्य
सहायार्थंपितामाताचतिष्ठति नपुत्रदारानज्ञातिर्धर्मस्तिष्ठतिकेवलः ३
तस्माद्धर्मंसहायार्थंनित्यंसंचिन्त्यसाधकैः स्वधर्मेणसहायेनतमस्तरतिदुस्त
रं ४ आचारःप्रथमोधर्मःश्रुत्युक्तःस्मार्त्तएवच तस्मादस्मिन्समायुक्तोनित्यं
स्यादात्मनेद्विजः ५ आचाराल्लभतेह्यायुराचाराल्लभतेप्रजाः आचाराद्धनम॰

स्वय्यमाचारोहंतिपापानां ६ दुराचारोहि पुरुषोलोकोभवतिनिंदितः दुःखभागी
चसततंव्याधितोध्यापिकोपिच ७ परित्यजेदर्थकामौयोस्यातांधर्मवर्जितौ ॥
अधर्मेषुरतोनित्यंलोकविद्विष्टमेवच ८ यथाचलोकविद्विष्टमप्यपर्केगवांलभी ॥
उष्ट्रायोष्ट्रायवोध्यंकिमयहष्टतंष्टतं ९ दत्तंचदापितंवापिसत्यासत्यपि
भाषिता अथआत्मचिंतनं उपपानेषुसर्वेषुपानकेषुमहत्स्वपि अवाप्युर
जनीयांतंब्राह्मेध्यानंसमाचरेत् १० उरःस्थानानचरणः सव्येतरस्योतरंकरं
उत्तानंकिंचिदुत्तानंमुखंविष्टभ्यचोरसा ११ निमीलिताक्षःसत्वस्थोदंतैर्दंता

२

नसंस्पर्शेन तालुस्थाचलजिह्वस्य संवृतास्य हनिश्चलः १२ सन्निरुद्धेन्द्रियग्रा
मोनातिनिम्नोपस्थितासनः द्विगुणं त्रिगुणं वापि प्राणायाममुपक्रमात् १३ ततो
ध्येयः स्थितो योऽसौ हृदये दीपवत्प्रभुः धारयेत्तत्र चात्मानं धारणां धारयेद्बुधः
१४ आत्मानं धारयेत्तत्र प्राणायामेन धारणा सधूमस्य विधूमस्य सगर्भस्याप्य
गर्भकः १५ सलक्षस्याप्यलक्षस्य प्राणायामस्तु षड्विधः तत्र सधूमगकारः प्रा
णायामस्तमायोगः प्राणायाम इतीरितः प्राणायाम इति प्रोक्तो रेचपूरककुंभकैः १६
वर्णत्रियात्मका ह्येते रेचपूरककुंभकैः स एवं प्रणवं प्रोक्तो प्राणायामस्तु तन्मयः १७

ईडयांवायुमारोप्य पूरजित्वोदरं स्थितं शनैर्षोडशभिर्मात्रै रोंकारं तत्र संस्मरेत् १८
एवं संयमाग्निं ध्यात्वा मानसैः संपूजयेत् अथ सर्वदेवताध्यानप्रकारः आधारादि
सहस्रारपर्यंतं अजपः संकल्पः आधारे लिंगनाभौ प्रकटित हृदये तालुमूले लला
टे द्वे पत्रे षोडशारे द्विदश दशदले द्वादशार्धे चतुष्के वासांते बालमध्ये डफकठ
सहिते कंठदेशे स्वराणां हंसं तत्वार्थयुक्तं सकलदलगतं वर्णरूपं नमामि तत्र
व्याख्यानं शुद्धसुषुम्ना आधारमंडले चतुर्दलपद्मस्थिता यां श्रीगणेशस्य हेमवर्णः
षट्शतं अजपा गायत्री मंत्रस्य ऐं बीजं ईं शक्तिः ईश्वर ऋषिः वं शं षं सं इति मा
तृकासहिते अत्र गंधाक्षत पुष्प धूप दीप नैवेद्य फलतांबूल मानसपूजा श्री

गणेशायनमः षट्शतंअजपामंत्र समर्पयामि ह्रसमामुद्रा स्वाधिष्ठानमंडपेषट्दल
२ पद्मस्थितायांचशावित्रीशक्तिः रक्तवर्णः षट्सहस्रअजपामंत्रस्य ह्रींबीजंक्रियाशक्तिः
इंद्रऋषिः वंभंमंयंरंलं इतिमातृकासहिते अंतरंगंध्यानं० ब्रह्मणेनमः षट्सहस्र
अजपामंत्रः विततमुद्रा नाभौमणिपूरमंडपेदशदलपद्मस्थितायां श्रीविष्णुर्देव-
ता श्रीशक्तिः कृष्णवर्णःषट्सहस्रअजपामंत्रस्य ह्रींबीजं क्रियाशक्तिः इंद्रऋषिः डंढं
णंतंथंदंधंनंपंफं इतिमातृकासहिते अंत० श्रीमहाविष्णवेनमः षट्सहस्र अज
पामंत्रजप स० विस्तृतमुद्रा अनाहतमंडपे द्वादशदलपद्मस्थितायां श्रीरुद्रोदेव
ता गौरीशक्तिः श्वेतवर्णः षट्सहस्र अजपामंत्रस्य ऐंबीजं इच्छाशक्तिः ईश्वरऋषिः
कंखंगंघंङं चंछंजंझंञंटंठं इतिमातृकासहिते० श्रीरुद्रायनमः षट्सहस्रअज०

५

लिंगमुद्रा स्वरेकंठे विसुद्धमंडले षोडशदलपद्मस्थितायां श्रीजीवात्मादेवता अव्यक्ता

शक्तिः स्फटिकवर्णः एकसहस्रअजपामंत्रस्य हंबीजं स्वराः शक्तिः अग्निऋषिः अं

आं इं ईं उं ऊं ऋं ॠं लृं ॡं ऐं ऐं ओं औं अंअः इतिमातृकासहिते श्रीजीवात्मनेनमः ए

कसहस्रअजपा जपं ० मोद्रमुद्रा भ्रूमध्यमंडले द्विदलपद्मस्थितायां श्रीपरमा

त्मादेवता मायाशक्तिः आकाशवान्ज्योतिर्वर्णः एकसहस्रअजपामंत्रस्य ह्रींबीजं

स्वरात्मशक्तिः ईश्वरऋषिः हंक्षं इतिमातृकासहिते श्रीपरमात्मनेनमः एकसह

स्र ० प्रकाशमुद्रा शिरस्थानेसहस्रदलपद्मसंस्थितायां श्रीगुरुर्देवता गकारशक्तिः शा २

स्फटिकवर्णः एकसहस्रअजपामंत्रस्य परमात्माबीजं श्रीशक्तिः परब्रह्मऋषिः ॐ

४ मितिपरब्रह्मस्वरूपिणे ऽअत्र श्रीगुरवे नमः एकसहस्रं ऽअजपा० ऽअथ न्यासः षड्दीर्घस्वरेणाष
ड्ङ्गः ॐ हं सां सूर्यात्मने ऽअंगुष्ठाभ्यां नमः ॐ हं सीं सोमात्मने तर्जनीभ्यां ॐ हं सूं निरंजनात्मने म
ध्यमाभ्यां ॐ हं सैं निराभासात्मने ऽअनामिकाभ्यां ॐ हं सौं ऽअव्यक्तात्मने कनिष्ठिकाभ्यां ॐ हं
सः ऽअणुसूक्ष्मप्रचोदयात् करतलकरपृष्ठाभ्यां एवं हृदयादिः भूर्भुवः स्वः इति दिग्बंधः ऽअथ
ध्यानं ऽअरुणकमलसंस्थाय द्मसंस्था च गौरी हरनियमितचिद्रूप द्मतं न्यूनपादं भजतिम
वतिभीदं प्राप्यते पापमुक्तं शिवदर्शनपुण्यं चाप्यसूर्यप्रभाते १ गतदिनसूर्योदयमारभ्य ऽअद्य
सूर्योदयपर्यंतं श्वासोच्छ्वासरूपेण एकेनाधिकविंशतिसहस्रषट्शत ऽअजपागायत्रीमन्त्रस्तम

र्पयामि हंसोगणेशोविधिरेवहंसोहंसोहरिर्हंसपरश्चशंभुः गमागमस्थंगमनादिशून्यंचिद्दंनि
रूकंतिमिरांधकारं १ आराधयामिमनसानिगमान्मलिङ्गंमायापुरीहृदयपंकजसंनिविष्टं श्र-
द्धानदीविमलचित्तजलाभिषेकंनित्यंसमाधिकुसुमेनपुनर्भवामि २ अजपानामगायत्रीयो-
गीनांमोक्षदायिनी अनयासदृशंपुण्यं अनयासदृशोजपः ३ अनयासदृशीविद्यानभूतोनभवि-
न ष्यति अजपांपठतेनित्यंपुनर्जन्मनविद्यते ४ अथजपः सोहमितिमन्त्रस्य आत्मादेवतापरमात्मा-
ऋषिः जीवेश्वरैक्यसिद्ध्यर्थेसोहमितिमन्त्रं० सोहंहंसः हंसः सोहं हकारः शिवरूपेणसकारः
शक्तिरुच्यते सोहंहंसोऽस्थामूर्त्तिर्जीवोजपतिसर्वदा षट्शतानिगणेशस्यषट्सहस्रंपितामहः

५ षट्सहस्रं गतप्राप्तिः षट्सहस्रं त्रिलोचनः । आत्मा एकसहस्रं तु सहस्रं परमात्मने सहस्रं गुरवे चैव ।
जपसंख्यां निवेदयेत् ॥ अथ जपो नरध्यानं स्थितिसेवागतिर्या त्वामति चिंतास्तु निर्वेच्यः । अहं सर्वात्म
कोविष्णुस्तु कृतिः सर्वं त्वदर्चनं गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः गुरुरेव परब्रह्म तस्मै श्री गुरवे नमः
इति उषःकाले आत्मचिन्तनं ॥ अथ स्नानप्रभातविधिः ॥ आचारहीनं न पुनन्ति वेदा यद्यप्यधीताः सह षड्भि
रंगैः छंदांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः । ब्राह्मे मुहूर्ते चोत्थाय तत्सर्वं सम्यगाचरेत्
पंच पंच ५५ उषःकालः षट्पंच ५६ अरुणोदयः । अष्टपंच भवेत् ५८ प्रातः शेषः सूर्योदयः स्मृतः ।
प्रातः समुत्थाय यः कुर्याद्द्विजो विण्मूत्रमेव च नैऋत्यां दिशि विहेयः मतिन्याम्यधिकं विप्र विण्मूत्रे ।

पित्र्यकर्मण्यस्य॰श्राश्रमे प्रथमे भवेत् निवीती पृष्ठतः कुर्याद्वानप्रस्थगृहस्थयोः कृत्वा यज्ञोपवीतं
तु पृष्ठतः कंठलंबितं विण्मूत्रं तु गृही कुर्यात्कर्णस्थं प्रथमाश्रमी ॰अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य
वाससा वाचं नियम्य यत्नेन ष्ठीवनश्वासवर्जितं॥ न फालकृष्टे न जले न चित्यां न च पर्वते न जीर्णे दे
वायतने न वल्मीके न च शाड्वले न सत्त्वेषु न गर्त्तेषु न गच्छेन पथि स्थितः न नदीतीरमासाद्य न भस्मनि स्थि
न गोमये शौचं यत्नः सदा कार्यः शौचमूलं द्विजः स्मृतः शौचाचारविहीनस्य समस्ता निष्फलाः क्रि
याः ॰अंतर्जलाद्देवगृहाद्वल्मीकान्मूषकोत्करात् कृतशौचावशिष्टा च न ग्राह्याः पंचमृत्तिकाः त्रिपर्व
परमात्रा वा मृत्तिका तु प्रमाणतः ॰आर्द्रामलकमात्रा वा मूत्रशौचे तु मृत्तिकाः मूत्रात्तु द्विगुणं पु ॰

६ कै मैथुने त्रिगुणं स्मृतं उच्चारे मैथुने वापि प्रस्रावे दन्तधावने स्नाने भोजनकाले च षट्सु मौनं समा
चरेत् संध्ययोरुभयोर्जाप्ये भोजने दन्तधावने पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः गुरूणां संनि॰
धौ दाने योगे चैव विशेषतः एषु मौनं समातिष्ठन् स्वर्गं प्राप्नोति मानवः द्विजो मूत्रपुरीषं च दिवा कुर्या
दुदङ्मुखः दक्षिणाभिमुखो रात्रौ संध्ययोश्च तथा दिवा छायायामन्धकारे वा रात्रावावहनि द्विजः य॰
थासुखमुखः कुर्यात्प्राणबाधाभयेषु च ग्रामकक्ष्यं च विण्मूत्रं काष्ठलोष्ठतृणादिना उद्धृतवासा
उत्तिष्ठेद्दृढं विण्मूत्रमेहनः वाय्वग्निविप्रमादित्यमापः पश्यंस्तथैव गाः न कदाचन कुर्वीत विण्मूत्र
स्य विसर्जनं एका लिङ्गे करे तिस्र उभयोर्मृद्द्वयं स्मृतं मूत्रशौचं समाख्यातं शुक्रे तु द्विगुणं भवेत् पं

चापाने दशैकस्मिन् उभयोः सप्तमृत्तिकाः वामपादपुरस्कृत्य पश्चाद्दक्षिणमेव च प्रत्येकं च चतुर्वा
रं मृत्तिकालेपयेत्सुधीः एवं शौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः त्रिगुणं वानप्रस्थस्य यतीनां च ॥
चतुर्गुणं इति मूत्रपुरीषोत्सर्गविधिः अथ दन्तधावनः कंटकिक्षीरवृक्षोत्थं द्वादशांगुलमानकं क
निष्ठिकाग्रवत्स्थूलं पर्वार्धकृतकूर्चकं करंजोदुंबराश्वत्थकदम्बो लोध्रचम्पको बदरीतिन्दुकांश्चे
ति प्रोक्ता वै दन्तधावने दन्तधावनमन्त्रः अन्नाद्याय व्यूहध्वं सोमो राजायमागमत् स मा मुखं प्रमार्क्ष्य
ते यशसा च भगेन च आयुर्बलं यशो वर्चः प्रजापशुवसूनि च ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्प
ते अभावे दन्तकाष्ठस्य प्रतिषिद्धदिनेषु च अपां द्वादशगंडूषैर्विदध्याद्दन्तधावनं उदिते तु सहस्रां

७ शौचः कुर्याद्दन्तधावनं सविताऽभिहितस्तेन स्वकुलं तेन घातितं प्रतिपद्दर्शषष्ठीषु नवम्येकादशीरवौ दन्ता
नां काष्ठसंयोगाद्दहत्यासप्तमं कुलं इति दन्तधावनविधिः ॥ अथाचमनविधिः कृत्वा तु पादशौचं च विम
लं पूतजलं त्रिः पिबेद्द्विः प्रमृज्यौ द्विः शिरस्यंगुष्ठमूलेन मुखं सजलमभिमृशेन्नासिकां द्वयं पूर्णं अङ्गुष्ठानामिका
भ्यां नयनयुगलं कर्णयुग्मं कनिष्ठाङ्गुष्ठो नाभिदेशो हृदयमथ तलेनांगुलीभिः शिरोंऽसौ मुहुः स्पृ
शेदाचमनं पुराणं वैदिकं तथा तांत्रिकं श्रौतमित्यादि षड्विधिः श्रुतिचोदितं विण्मूत्रादिके शौचेषु
क्तं च परिकीर्तितं स्मार्त्तं पौराणिकं कर्म॰ प्राचीनैर्विधिपूर्वकं वैदिकं श्रौतमित्यादि ब्रह्मयज्ञादिपूर्वकं
॰अस्त्रविद्यादिकं कर्म तांत्रिके विधिरुच्यते ॥ अथ शिखाबंधनं सप्तलोकांश्च गायत्रीं निबध्नीत शिखां तां

नः पुनराचम्य हृदयं वा हस्तं पादौ च संस्पृशेत् कृते निष्ठीवने चैव दन्तोच्छिष्टे तथानृते पतितानां च सं
भाषे दक्षिणं श्रवणं स्पृशेत् ॥ अग्निरापश्च वेदाश्च सोमसूर्यानिलास्तथा ॥ सर्वे भवन्ति विप्रस्य कर्णे
तिष्ठन्ति दक्षिणे ॥ अथ स्नानविधिः ॥ अस्य त्वा होमकालस्य बहुत्वात्स्नानकर्मणः ॥ प्रातर्न तनुयात्
स्नानं होमकालविगर्हितः ॥ ततः साग्निकस्य पादप्रक्षालनादि गोमयविलेपनान्तं विधाय शुचौ दे॰
व्याहृत्याभिषिंच्य निमज्याचम्य दर्भैः प्रणवव्याहृतिगायत्रीभिः प्रतिमन्त्रं पाठं कृत्वा ॐ भूः पुनातु ॐ भुवः
पुना॰ ॐ स्वः पु॰ ॐ महः पुनातु ॐ जनः पु॰ ॐ तपः पु॰ ॐ सत्यं पु॰ ॐ भूर्भुवः स्वः ब्रह्मरंध्रं पुनातु ॐ
तत्सवितुर्वरेण्यं ॐ भर्गो देवस्य धीमहि ॐ धियो यो नः प्रचोदयात् ॐ परो रजसे सावदों ॐ आपो ज्योती

८ रसोमृतं ब्रह्मभूर्भुवस्सुवरोम् सर्वं पुनातु तद्यथामन्त्रान्तरे आदौ पापविमोचनं पठित्वा प्रणवव्याहृति
पूर्वकं गायत्रीमन्त्रेण स्नात्वा पूर्वं महर्षयः सप्त छन्दांस्येव चतुष्टयं अन्तःकारणविशिष्टं पठते पापमो
4 चनं गायत्र्यास्तु परं नास्ति इह लोके परत्र च गायन्तं त्रायते यस्माद्गायत्रीत्यभिधीयते इति मूर्तिम
यीं ध्यात्वा पुनर्निमज्य निरग्निकस्तु कृत्स्नमनुतिष्ठेत्संकोचनमिनस्य होमस्याभावात् जदिनः शिरो-
रोगिणश्चकं ठमज्जनं स्नानं समर्थयोषितां च ग्रहणादिनिमित्तं गंगादितीर्थसंक्रान्त्यादिपर्वनिमित्तं च
फलप्रदं ब्रह्मचारी नाम पित्तशिरस्कारमेव स्त्रीशूद्रादिश्च सर्वत्र तूष्णीं कुर्यात् आचम्य प्राणानाय-
म्य देशकालौ स्मृत्वा जलमध्ये प्राणायामं कुर्यात् सत्त्वविधूमप्रकारः निःशेषकुम्भके नविधूमाः

ग्निं ध्यायेत् प्रणवेनतुसंपूर्णं व्याहृतीभिश्च सप्तकं वा फं वा योजयद्धि प्राणासंयमनत्रयं ब्राह्म॰
णः श्रुतिसंपन्नः स्वधर्मनिरतः सदा सवैदिकं जपेन्मन्त्रं लौकिकं न कदाचन गोश्वंगे सर्षपोयाव॰
धावन्नेषां मनःस्थिरं तन्नारयेन्नभोऽपहीनोऽपिन्तेकोन्तरं शतं गवांशिरसिश्रृङ्गे चतवचित्ते मनःस्थिरं ता
रयंति उभौपहीनोऽपिन्तेकोन्तरं शतं इति विधूमः सधूमः श्वासस्तंपक्तोऽविधूमः श्वासवर्जितः स॰
गर्भोजपसंयक्तोऽयं गर्भोध्यानमात्रकः पुनर्मज्जनं श्वारे गायत्रीमंत्रेण स्नानं कुर्यात् शुचीवोरुथ्या श्वा
याहिषाशान्नोदेवी पुनर्गायत्री अघमर्षणस्नानं कुर्यात् ऋतंचेत्यिऋचस्य अघमर्षण ऋषिः भाववृतोदे
वता अनुष्टुप्छन्दः पापपुरुषविसर्जने वि॰ ॐ ऋतं च सत्यं॰ अप्पजलतर्पणं ब्रह्मादयोदेवताः ॐ तं

२१ देवांस्तर्पयामि ॐ भूर्देवां॰ ॐ भुवर्देवां॰ ॐ स्वर्देवां॰ ॐ भूर्भुवस्स्वर्देवां॰ उपवीति कृत्वा द्वैपायनादयो ये ऋ
षयः ॐ तानृषींस्त॰ ॐ भूः ऋषींस्त॰ ॐ भुवः ऋषीं॰ ॐ स्वः ऋषीं॰ ॐ भूर्भुवः स्वः ऋषीं॰ प्राचीनावी
ती सोमः पितृमान्यमोंगिरस्वानग्निष्वात्ताग्निः कव्यवाहनादयो ये पितरः ॐ तान्पितॄंस्त॰ ॐ भूः
पितॄन्॰ ॐ भुवः पितॄंस्त॰ ॐ स्वः पितॄंस्त॰ भूर्भुवः स्वः पितॄंस्त॰ यक्षरक्षःस्मराः सिद्धाः प्रमथाः सर्वनागास्तथाः
भूतप्रेतपिशाचाश्च स्नानोनेग्रह्यतां जलिः इति तीरे त्रिस्रोदकं दद्यात् इति पंचांगस्नानविधिः नद्या
द्यन्नग्निकैः मूत्रविधिपूर्वकं प्रातःस्नानं कुर्यात् एवमुक्तविधिस्नात्वा उत्तीर्य जलाद्बहिर्निष्क्रम्य धौते
रजकप्रक्षालिते शाटकेऽशुष्के प्लुष्टे अनग्निदग्धे अच्छिन्ने अस्फाटिते अमलिने गैरिकादिरंगेण अवि

कृते कार्पासवाससोऽभावेन नरीये द्वे वस्त्रे परिधाय धृत्वा ॥ अत्र पयोर्देशाचारं परिधानस्य नित्यासविशे
षग्रांन हृद्यं गोमयेन विलिप्य ॥ धौताभावे पाणिजलेन होमादिकं कुर्यानामन्यत मे ॥ अथ मुद्रितेति द्वितीय
वस्त्राभावे नाभीय उपवीतं पोगपट्टे वा कुशरज्जुं वा सूत्रं वा परिधानीयस्योत्तरार्द्धं वा उत्तरीयं कुर्वीत ॥ पृथि
वीति मंत्रस्य मेरुपृष्ठ ऋषिः कूर्मो देवता सुतलं छन्दः ॥ आसने वि० ॐ पृथ्वी त्वया० कूर्ममुद्रां प्रद
र्शयेत् ॥ आसनाय नमः ॥ आसनं ॥ अपसर्पन्तु इत्यासनं ॥ अथ विभूतिविधिः सद्योजातमिति पंचमन्त्रेण ।
विभूतिमभिमंत्रयेत् ॥ शन्नो देवीति मंत्रेण जलं क्षिपेत् ॥ त्र्यम्बकमिति मंत्रेण विभूतिमंगुष्ठेन मर्दयेत्
मानस्तोके इति मंत्रेण हृद्यककुद्भ्रूमध्ये ललाटं प्रेललाटे शिरस्बाहोः सर्वाङ्गेषु आपादतलं विभूतिलेपनं ॥ अ

१० पवित्रधारणं रुद्राक्षकंठदेशे दशनपरिमितैर्मस्तके विंशतिद्वेषट्‌षट्‌ कर्णप्रदेशे करयुगलकृ
ते द्वादश द्वादशैव बाहुर्हिंदोः कलाभि १६ नैयनयुगकृते ४ एकमेकं शिखायां वक्षस्थलेष्वधिकं
यः कलयति सततं स स्वयं नीलकंठः सद्योजातमिति पंचमंत्रेण रुद्राक्षधारणं कुर्यात् अथ रुद्राक्ष
मंत्रा आश्च परिपूर्णाः दृढास्तथा निष्फलाः पंचपिताश्चैव अन्योन्यं तृषिविवर्जिताः सशब्दाश्चैव लायेतु
नष्टिताग्रस्थिताश्रुता छिन्नसूत्रेण वैच्छिन्ना पापंडयाख्याः पुरं ततः एकवक्त्राः पंचवक्त्राः सप्तव
क्त्रास्तथा परे चतुर्दशमुखाः केचिद्वदंति मुनिसत्तमाः मुखंमुखेन संयोज्य पुच्छं पुच्छेन योजयेत्॥
प्रोक्तव्यासिनरक्षायैसूत्रैस्तत्कर्मसिद्धये क्षालयेत्पंचगव्यैस्तान् सद्योजातेन तज्जलैः धूपयेत्ता॰

मयोरेण लेपेनानुरूपेणानु मंत्रयेत्प्रत्येकेनैव प्रत्येकं तु शतं शतं येन प्रतिष्ठिता माला विधिवत्क्र
रयेत्तुपः स्त्रीशूद्रादिकैर्न मंत्रयेत् इति रुद्राक्षविधिः अथ भूतशुद्धिः मूलाधारात्समुत्थाय कुंड
लीपरदेवतां सुषुम्नामार्गमाश्रित्य ब्रह्मरंध्रगतां स्मरेत् जीवं ब्रह्मणि संयोज्य हंस मंत्रेण साधकः
हंसः सोहं पादादिजानुपर्यंतं चतुष्कोणं सवज्रकं लंबीजाढ्यं स्वर्णवर्णं स्मरेद्ध्वनिमंडले जान्वा
दिनाभिचंद्रार्द्धनिभं पद्मद्वयांकितं वंबीजयुक्तं श्वेतमंभसो मंडलं स्मरेत् नाभ्यादहृदयपर्यंतं त्रि
कोणं स्वस्तिकासनं रंबीजेनैव संयुक्तं स्मरेत्पावकमंडलं हृदाद्भ्रूमध्यपर्यंतं वृत्तं षड्बिंदुलांछितं ।
यंबीजान्वितं धूम्राभं नभस्यं मंडलं स्मरेत् आब्रह्मरंध्रं भ्रूमध्याद्वृत्तं स्वच्छं मनोहरं हंबीजयुक्तमा ।

११ काशंमंडलंचविचिंतयेत् एवंभूतानिसंचिंत्यप्रत्येकंप्रविलापयेत् भुवंजलेजलंवह्नौवह्निंवायौ
मरुत्वस्मि विलाप्यखमहंकारेमहत्तत्वेप्यहंकृतिः महांतंप्रकृतौमायामात्मनिप्रविलापयेत् शु
द्धःसंविन्मयोभूत्वाचिंतयेत्पापपूरुषं वामकुक्षिस्थितंकृष्णंअंगुष्ठपरिमाणकं विप्रहत्याशि
रोयुक्तंकनकस्तेयबाहुकं मदिरापानहृदयंगुरुतल्पकटिद्वयं तत्संयोगीपदद्वंद्वमुपपातकरोम
कं खड्गचर्मधरोदुष्टमधोवक्त्रंसुदुःसहं वायुबीजंस्मरन्वायुंसंपूर्यैनंविशोषयेत् यं १६ पूरकं।
वह्निबीजंस्मरन्तेननिर्दहेत्पापपूरुषं रं ६४ कुंभकं वायुबीजेनतद्भस्मबहिर्निष्कासयेत्ततः यं ३
२ सुधाबीजेनदेहोत्थंभस्मसंप्लावयेत्सुधीः वं २० भूबीजेनघनीकृत्यभस्मतेनकनकाण्डवत् लं

विशुद्धसुरुणाकाशं ब्रह्मरंध्रगतं स्मरेत् ॰आकाशादीनि भूतानि पुनरुत्पादयेच्चितः ॰अथैवं ब्रह्मरूपं
चास्य परं कः पुरुषोत्तमः प्रकृतिः प्रकृतेर्महान् ततोऽहं त्रिगुणात्मकं तस्माद्धा॰ तस्मादात्मनः आका
शसंभूतः ॰आकाशाद्वायुः वायोरग्निः ॰अग्नेरापः ॰अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्यो
न्नं ॰अन्नाद्रेतः रेतसः पुरुषः स वा एष पुरुषोऽन्नरसमयः हंसः सोऽहं कुंडल्या जीवमादाय परसंगात्क
धामयी संस्थाप्य हृदयांभोजे मूलाधारगतां स्मरेत् इति भूतशुद्धिः ॰अस्य श्री प्राणप्रतिष्ठामंत्र
स्य ब्रह्मा विष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छंदांसि मुखे जगत्सृष्टिकारिणी प्राणशक्ति
र्देवतायै हृदये॰ आंबीजं सीगे ह्रीं शक्तिः पादयोः क्रौं कीलकं सर्वांगेषु प्राणप्रतिष्ठापने वि॰ ओं ह्रीं क्रों

१२ ॰अं कं खं गं घं ङं॰ पृथिव्यप्तेजोवाय्वाकाशात्मने॰ आं हृदयाय॰ ॐ॰ आं ह्रीं क्रौं इं चं छं॰ इ शब्दस्पर्शरूपरसगं
धात्मने ईं शिरसे स्वाहा ॐ॰ आं ह्रीं क्रौं उं टं ठं डं ढं णं त्वक्चक्षुःश्रोत्रघ्राणजिह्वात्मने ऊं शिखायै वषट् ॐ॰
आं ह्रीं क्रौं एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुं ॐ॰ आं ह्रीं क्रौं॰ ओं पं फं बं भं मं वच
12 नादानगतिविसर्गव्यवहारात्मने॰ औं नेत्रत्रयाय वौषट् ॐ॰ आं ह्रीं क्रौं॰ अं यं रं लं वं बुध्यहंकारचित्तचेतन्या
त्मने॰ अः॰ अस्त्राय॰ नाभेरारभ्य पादांतं॰ आं इति पाशबीजं हृदयादारभ्य नं ह्रीं इति शक्तिबीजं मस्तका
दारभ्य हृदयांतं क्रौं इति॰ अंकुशबीजं न्यसेत्॰ अथ ध्यानं रक्तांभोधिस्थपोतोल्लसदरुणसरोजा॰
धिरूढा कराब्जैः पाशं कोदंडमिक्षूद्भवमथगुणमप्यंकुशं पंचबाणान् बिभ्राणासृक्कपालं त्रिनय॰

राम

नलस्मितापीनवक्षोरुहाह्याद्देवीबालार्कवर्णाभवतुसुखकरीप्राणशक्तिःपरानः हृदिकरधृत्वा
ॐ आं ह्रीं क्रोंयं र हंसः सोहं मम प्राण इह प्राणाः पुनः आंह्रीं जीव इह स्थितः पुनः आंह्रींक्रोंयं र म ।
मेन्द्रियभूतानि वाक्मनश्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादप्राणाः इहागत्यसुखंचिरंतिष्ठन्तुस्वाहा य
णवस्य पंचदशावृत्तिंकृत्वा अनेनमम अस्यदेहस्यज्ञानकर्मादिपंचदशसंस्काराःसंपाद्यन्तां अ ।
यंदेहःसर्वकर्माराधनयोग्योजातइतिभावयेत् ॐ १५ भूयः यथापर्वतधातूनांदोषान् दहतिपाव
कः एवमन्तर्गतंपापंप्राणायामेनदह्यते पंचदशप्राणायामंकुर्यात् इतिप्राणप्रतिष्ठा अथत्रिका
लसंध्याविधानं प्रातःसंध्यामन्त्रतन्त्रा मध्याह्नेचसमभास्करः सपूर्वापश्चिमांसंध्यांनित्यःसंध्यामु ।

१३ 13 पासने उत्तमा नारकोपेता मध्यमा लुप्ततारका ॥ अधमा सूर्यसहिता प्रातःसंध्या त्रिधा स्मृता उत्तमा
सूर्यसहिता मध्यमा लम्बिते रवौ ॥ अधमा तारकोपेता सायंसंध्या त्रिधा स्मृता विप्रो वृक्षो मूलकं तत्र सं
ध्या वेदः शाखा धर्मकर्माणि पत्रं तस्मान्मूलं यत्नतो रक्षणीयं छिन्ने मूले नैव वृक्षो न शाखा ॥ अथ प्रातःसंध्या आ
चम्य प्राणानायम्य ॥ अथ पुराणाचमनं ॐ केशवाय नमः ॐ नारायणाय नमः ०२४ प्रणवपूर्वकं नाम चतुर्विं
शतिसंख्यया स्वाहान्तं ग्राशयेद्धरिर्नमोन्तं स्पर्शयेत्तु च केशवादि त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ मुखं प्र
क्षालयेद्द्वाभ्यां द्वाभ्यां मुन्मार्जनं तथा हस्तेनोष्ठौ च संस्पृश्य पादावपि शिरोपि च संकर्षणादि देवानां द्वादशानां ॥
निसंस्पर्शनं दक्षिणेनोदकं पीत्वा वामेन संस्पृशेद्बुधः तावत्तत्र शुध्यते नो यं यावद्वामेन संस्पर्शनं गोकर्णाकृति

हस्तेनमाषमात्रंजलंपिबेत् तन्न्यूनमधिकंपीत्वासुरापानंभवेद्द्विजः संहतांगुलिनातोयंपाणिनादक्षिणेनतु
मुक्तांगुष्ठकनिष्ठाभ्यांशेषेणाचमनंविदुः ॥ अथप्राणायामः प्रणवस्यपरब्रह्मऋषिः परमात्मादेवता ।
देवीगायत्रीछंदः प्राणायामेवि० ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यं ॐतत्सवितुर्वरेण्यंभर्गो
देवस्यधीमहि धियोयोनःप्रचोदयात् ॐआपोज्योतीरसोमृतंब्रह्मभूर्भुवस्वरोम् दक्षिणेरेचयेद्वायुंवामेनापूरितोदरं
कुम्भेनधारयेन्नित्यंप्राणायामंविदुर्बुधः पीडयेद्दक्षिणांनाडिंअंगुष्ठेनतथोत्तरां कनिष्ठानामिकाभ्यांचमध्यमाजे
नीत्यजेत् रेचकःपूरकश्चैवप्राणायामोथकुंभकः प्रोच्यतेसर्वशास्त्रेषुयोगिभिर्यतमानसैः रेचकःसृज्यतेवापू ।
पूरकस्तेनरोधकः साम्येनसंस्थितिर्यस्यकुंभकःपरिकीर्त्तितः नीलोत्पलदलश्यामंनाभिमध्येप्रतिष्ठितं चतुर्भु

२४ नेमहात्मानंपूरकेचिंतयद्धरिं कुंभकेतुहृदिस्थानेध्यायेत्तुकमलासनं प्रजापतिंजगन्नाथंचतुर्व
क्त्रंपितामहं रेचकेशंकरंध्यायेल्ललाटस्थंमहेश्वरं शुद्धस्फटिकसंकाशंनिर्मलंपापनाशनं पूरकेवि
ष्णुसायुज्यंकुम्भकेब्रह्मणोगतिः रेचकेनतृतीयंतुप्राप्नुयादीश्वरंपरं ॥ अथगर्भप्राणायामः ॥ अनेन
प्रकारेणकुर्यात् ॥ अथसकृत्स्नाचमनं प्रणवपूर्वमुच्चार्यसावित्रीचतद्दिव्यचं पापदोषापह.त्रिःपि
बेत्सकृत्वाचमनमुच्यते ॥ अथप्राणायामः गायत्रींशिरसार्द्धंजपेद्व्याहृतिपूर्वकं प्रतिप्रणवसंयुक्तं
त्रिवारंप्राणसंयमः ॥ अथध्यानं प्रातःसंध्यागायत्रींकुमारींरक्तांगींरक्तवर्णांरक्तवाससांहंसस्कंधस
मारूढांपाशांकुशाक्षमालाकमंडलुधरांऋग्वेदसहितांब्रह्मदेवत्यांरजोगुणयुतांभूर्लोकव्यवस्थितां

15

आदित्यपथगामिनीं आवाहयाम्यहं देवीमायान्तं सूर्यमण्डलात् ममोपात्त दुरितक्षयार्थं श्रीपरमे
श्वर श्रीत्यर्थं प्रातः संध्यामुपासिष्ये आपोहिष्ठेति तिसृणामांबरीषः सिंधुद्वीप ऋषिः आपोदेव
तागायत्री छन्दः मार्जने वि० सप्त च त्रय मा कापो वरच त्रय मक्लके नननत्रय पाताले आपोहिष्ठेतिः
(सिंच मेरंभयो ग्यो जान इति भावयेत् ॐ १५ भूर्भुवः यथापर्वतधातुनां दोषा) दृष्टा प्रकीर्तिताः सूर्यश्चेति मंत्र
स्य नारायण ऋषिः सूर्यमन्युमन्युपतयो देवता प्रकृतिच्छन्दः प्रातः संध्याचमने वि० ॐ सूर्यश्च मा मन्युश्च
० नवपादावर्तिक ऋषय० सद्वं चोव स्कं स्वाया त्रिक ऋचां त्रीण्यनुक्रम्य विंश मार्जनमुच्यते आपोहिष्ठेति नव १
चैस्य सूक्तस्य अंबरीषः सिंधुद्वीप ऋषिः आपो देवता गायत्री छंदः पंचमी वर्धमाना सप्तमी प्रतिष्ठा अंते द्वे १

१५ अनुष्टुभौ मार्जने वि॰ ॐ आपो हि ष्ठा मयोभुवः ॐ ता न ऊर्जे ॐ शन्नो देवीरभि॰ ऋतं चेति त्रिऋचस्य
स्याघमर्षण ऋषिः भाववृत्तो देवता अनुष्टुप् छन्दः अघमर्षणे वि॰ ॐ ऋतं च सत्यं॰ अनेन मंत्रेण
नासाग्रे तोयं नीत्वा भूमौ निक्षिपेत् आचम्य प्राणानायम्य अथ सकलहृत्प्राणायामः इडापूरणे वि
15 ष्णुसोमौ विचिन्त्यौं नमस्कल्प्य वह्निं सुषुम्नामध्ये स्मरेत् कुम्भके शंकरं ब्रह्मरेचने त्रीन् हुताशं त्रिकोणस्थ
रेखाः संपूज्य तथा रेचके पिङ्गलायां शिवेन पुनः पूरके कुम्भके रेचके च विलोमेन चैन्द्र चके कुम्भके च तत्
था पूरके साधकः सावधानः अथ अर्घ्यप्रकारः उदकं प्रक्षिपेद्यस्मात् तत्कारणमतः शृणु त्रिंशत्कोटयो
महावीर्या मंदेहा नाम राक्षसाः कृतघ्ना दारुणा घोराः सूर्यमिच्छन्ति खादितुं ततो देवगणाः सर्वे ऋषयश्च त

पोधनाः उपासते सदा संध्या प्रक्षिपेत्सूर्यकाञ्जलिं इत्येतेन दैत्यानि वज्रीभूतेन वारिणा एतस्मात्का
रणाद्द्विजः संध्यां नित्यमुपासते गायत्र्या गायत्री छन्दः विश्वामित्र ऋषिः सविता देवता गायत्री छन्दः
सूर्यार्घ्यदाने वि॰ अथास्त्रप्रहरणं अस्य श्रीब्रह्मास्त्रप्रयोगमन्त्रस्य ब्रह्माविष्णुमहेश्वरा ऋषयः
सविता देवता गायत्री छन्दः असुरसंहरणार्थे ब्रह्मास्त्रमन्त्रप्रहरणे वि॰ गच्छ देवी सुरश्रेष्ठे गायत्री ब्र
स्वरूपिणी सूर्यार्घ्यं च मया दत्तं दैत्यानां च वधं कुरु गायत्रीमन्त्रमुच्चार्याञ्जलित्रयं दद्यात् ततः उपसं
हरणमन्त्रः अस्य श्रीगायत्री उपसंहरणमन्त्रस्य भगवान् ऋषिः मूलप्रकृतिर्देवता गायत्री छन्दः गा
यत्र्युपसंहरणे वि॰ अथ न्यासः ॐ आपो अङ्गुष्ठाभ्यां ॐ ज्योतिः तर्जनीभ्यां ॐ रसः मध्यमाभ्यां ॐ

१६ अमृतं अनामिकाभ्यां ॐ ब्रह्म कनिष्ठिकाभ्यां ॐ भूर्भुवः स्वरोम् करतलकरपृष्ठाभ्यां एवं हृदयादिकं ।
कुर्यात् अथ ध्यानं सोहमर्क रहं ज्योतिरात्मज्योतिरहं शिवः आत्मज्योतिरहं शुक्रः सर्वज्योतिरसोमहं ह
रोसि पाप्मानं मे विद्धि उदर्गोसि पाप्मानं मे विद्धि संभर्गोसि पाप्मानं मे विधि ॐ आवायव्या वायव्या वायवा ।
यायव्यव्यग्रा और्वायव्या वायव्या आप ऊर्ध्वं उत्क्षिपंति ॐ ग्रानर्देवीमदितिंजो । राप्रेमित्रा । आसावा ।
दित्याब्रह्मेति प्रदक्षिणं कृत्वा यामेवा यामेवाराजन्नितो वरुणनोमुंच यदापो अघ्न्या वरुणेति शपामहे
ततो वरुणनोमुंच मेवापो मौषधीर्हिंसीरतो विश्वव्यचा भूस्ततो वरुणनोमुंच ॐ भूः तत्सवितुर्वरेण
यं ॐ भूरोमावाहयामि ॐ भुवः भर्गोदेवस्य धीमहि ॐ भुवरोमावाहयामि ॐ स्वः धियो यो नः प्रचोदयात् ।

ॐस्वरोमावाहयामि ॐ आगछवरदेदेवी गायत्रीब्रह्मरूपिणी जपानुष्ठानसिध्यर्थं प्रविश्यहृदयंम
म ॐ उत्तिष्ठदेविगंतव्यंपुनरागमनायच अर्घ्यं पुष्पंदेविगंतव्यंप्रविश्यहृदयंमम प्रातस्त्वदेविगंतव्यंप्र
विश्यहृदयंमम आचम्यप्राणानायम्य गायत्र्या गायत्रीछन्दः विश्वामित्रऋषिः ब्रह्मादेवतागायत्री
छन्दः प्रातःसंध्यातर्पणेवि· ॐ भूःपुरुषंतर्पयामि· ॐ ऋग्वेदपुरुषंत· ॐमण्डलंत· ॐहिरण्यगर्भं
त· ॐ आत्मानं· ॐगायत्रींत ॐवेदमातरंत· ॐसांकृतिं· ॐसंध्यांत ॐकुमारींत· ॐब्राह्मींत· ॐ
उषसींत· ॐनिमृजींत· ॐसर्वार्थसिद्धिकरींत· ॐसर्वमंत्राधिपतींत· ॐभूर्भुवस्वस्त· अथासन
विधिं यथाविधिकुर्यात् द्विराचम्यत्रिःप्राणानायम्य वैदिकाचमनंकृत्वाचमनं अथप्राणायामः तत्र

१७ सिद्धासनेनिःशेषकुम्भकं कुर्यात् नत्र खेचरीमुद्रां प्रदर्शयेत् चित्तं चरति खे यस्माज्जिह्वा चरति खेग
ता भ्रुवोरंतर्गता दृष्टिर्मुद्रा भवति खेचरी न चासनं सिद्धसमं न कुंभः केवलसदृशो लयः न खेचरीसमा मुद्रा न नादः सदृ
शो लयः अथ नादोत्पत्तिलक्षणं पंचावस्थाप्रणवोच्चार्य वायुं निर्गत्य यत्नतः स्थिरासने स्थिरो भूत्वा निरहंकारनिर्म
म अथ वसिद्धासने योनिस्थानकमंघ्रिमूलघटितं कृत्वा दृढं विन्यसेन्मेढ्रे पादमथैकमेव हृदये कृत्वा समं विग्र
हं स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्यन् भ्रुवोरंतरे चैतन्मोक्षकपाटभेदजनकं सिद्धासनं प्रोच्यते इःपद्मलक्षण
प्राणायामभेदः पूर्वं इडया पवनमद्व्याहिर्विस्पष्टसेनर्वतुरेषिचोसारयोरे विशेमदृवरो योगीत्सयं हि याहींपथि भवे
त इति दिग्बंधः इति चतुष्पदः ॐमित्येकाक्षरं ब्रह्म अग्निर्देवता ब्रह्मा ऋषिः गायत्री छंदः परब्रह्मस्वरूपणा

त्म

यत्री॰आवाहनेवि॰ ओं॰ आयातुवरदादेवी॰ अक्षरंब्रह्मसंमितं गायत्रीछंदसांमातेदंब्रह्मजुषस्वमे
यदह्नात्कुरुतेपापंतदह्नात्प्रतिमुच्यते यद्रात्र्यात्कुरुतेपापंतद्रात्र्यात्प्रतिमुच्यते सर्ववर्णेमहादेवीसंध्यावि
द्येसरस्वति॰ अजरे॰अमरेदेवीसर्वदेवनमोस्तुते ॰ओजोसिसहोसिबलमसिभ्राजोसिदेवानांधामनामासिवि
श्वमसिविश्वायुःसर्वमसिसर्वायुः॰ अभिभूरों गायत्रीमावाहयामिसावित्रीमावाहयामिसरस्वतीमावाहयामि
छंदर्षीनावाहयामिश्रियमावाहयामि गायत्र्या गायत्रीछंदोविश्वामित्रऋषिःसवितादेवता गायत्रीछंदः रक्तैव
र्णः॰ अग्निर्मुखंब्रह्माशिरोविष्णुर्हृदयं रुद्रःशिखावायुःपृथिवीयोनिः त्रैलोक्यचरणासांख्यायनसगोत्रात्रिपदा
गायत्रीजपेविनियोगः॰ अथशापविमोचनं॰ अस्यश्रीब्रह्मशापविमोचनमंत्रस्यनूतनऋषिकत्रीमजाप

नित्र ऋषिः शक्तिर्देवता गायत्री छन्दः ब्रह्मशापविमोचनार्थं जपे वि॰ ॐ गायत्रीं सनतं भजामि विश्वरूपानुप॰
मस्मि देवा जाता॰ प्रजायंत॰ अथैतां प्रजापतिमाहूतः शक्तिः सावित्री भजे विश्वमाघं सृजेति ब्रह्मशापवि
मुक्ताभव ॥ अस्य श्री विश्वामित्र शापविमोचन मंत्रस्य निग्रहानुग्रह कर्ता विश्वामित्र ऋषिः शक्तिर्देवता गाय
त्री छन्दः विश्वामित्र शापविमोचनार्थं जपे॰ गायत्रीं सनतं भजामि ऋमुखी विश्वगर्भा यद्भुवा देवाः स्वक्रि॰
रे विसृष्टि यत्कल्याणी॰ अभिष्टिकरी प्रपद्य मुखीन सृ खिन वेद गर्भां विश्वामित्रं शापविमुक्ताभव ॥ अस्य॰
श्री वशिष्ठ शापविमोचन मंत्रस्य निग्रहानुग्रह कर्ता वशिष्ठ ऋषिः शक्तिर्देवता गायत्री छन्दः वशिष्ठ शाप
विमोचनार्थं जपे वि॰ ॐ अहोम हानवहु रूपी दिव्ये संध्ये सरस्वति ॥ अजरे अमरे चैव ब्रह्मरूपीन मोस्तुते व

18

सिष्ठशापविमुक्ताभव ॐ कृत्वाचम्यप्राणानायम्य सव्याहृतीं सप्रणवां गायत्रीं शिरसासह त्रिःपठेदायतः
प्राणान् प्राणायामस्यलक्षणं ऽगायत्रीऽप्रतन्त्रं जपेत् ॐ यांकल्पयंतिनोरयः क्रूरांकृत्यांवधूमिव तूयादचो
प्रनः यो यो धीहिमधीस्यवर्देर्गोभण्यंरेवंतुविस्तत्स्ववर्भूर्भुरों तांब्रह्मणापनिर्णुद्मः प्रत्यकर्तारमृच्छतु हनह
नहुंफट् पूर्वप्रयोगउत्तरप्रयोगध्यानमुद्रादिकप्रहरणं आकर्षणं गुरुमुखेन कुर्यात् इतिब्रह्मास्त्रं पीवर्णवतीं
कर्णवतींविश्वरूपांभयंप्रचोदयात्नोयोधियोधीमहिदेवस्यभर्गोवरेण्यंसवितुस्तत् यःप्राहिणोन्मेदिवाघनानि
तंत्वेषाजपाम्यभिः हनहनहुंफट् इतिऽग्नेयास्त्रं येनद्विषेद्धरसिप्रतिकूलमयापिनि धियोयोनःप्रचोद
यात् भर्गोदेवस्यधीमहितत्सवितुर्वरेण्यं तमेवैतानिवध्यौषामसंज्ञाछोऽनागसः हनहनहुंफट् इतिनागाय

१९ णमन्त्रं अत्रविशेषमाह ध्यानमुद्रादिकंनकुर्यात् नप्रयोगादिकंसंरक्षणमात्रे अंतेषडंगकुर्यात् अभिवर्ज्ञस्यकर्त्री
रंनिरस्तास्माभिरोजसः देवक्तासेजररोत्स्ययाद्योप्रनः योयोधीह्निमर्थीस्यवेद्गौमध्यंरोर्वेनुविस्सनस्वभूर्भुवःहीं । व
अस्मापुरभिनिः कृतस्यप्रजो चपुरुषासिनि हनहनहुंफट् इतिपाम्युपतास्त्रं पत्वाकृत्येचकारेहतंत्वंगच्छपुन ।
नैवे आवापय्यपावापय्यापयवापयाव्ययवअ्पा औदीयपय्य पावापय्या अरातिकृत्येनाशायसर्वोअपातुयान्तः
त्रिंप्रकृत्येनिवर्त्तस्व हनहनहुंफट् इतिवापयास्त्रं अथमंत्रोद्धारः प्रणवपूर्वमुच्चार्यत्रिबीजसंपूतंलिखे
त् अंतेप्रणोवलिख्यंतुमकारेहिविशेषतः आद्यौसवित्बीजंचमायाबीजंततःपरं अन्तेचशेषबीजानिसं
पुटंप्रणवेनयेत् रेखावृतंचसंपूज्यमष्टाकंचसमन्वितं अन्तेचचतुरंकानिद्धिरेखाश्वविशेषतः षट्कोणेर

19

राम

वेतालैश्चाघवर्णान्तरसमन्वितः तत्र गुरुमुखेन नारायणमन्त्रं आदौ विलोमेन पठेत् अथवा गुरुसंप्रदायेन आ
दौ पाशुपतास्त्रं अन्यप्रयोगकालेन विपरीतं करिष्यति अथ नारायणमन्त्रप्रकारः अस्य श्रीनारायणमन्त्रप्रयो
गमन्त्रस्य आदिनारायणो देवता विराट्छन्दः अणुब्रह्मोडऋषिः व्यापकं शक्तिः ॐकार इति बीजं हुंफट् प्रकृति
स्वरूपं आत्मसंरक्षणार्थं भूतप्रेतपिशाचशाकिनीडाकिनीब्रह्मराक्षसवेताल· आगमणावरादिउपघातकम
यादि· आत्मत्रयसंरक्षणार्थं आदिनारायणप्रीत्यर्थं नारायणमन्त्रजपे वि· अथ न्यासः ॐ वंस्यप्रस्ते· अंगुष्ठाभ्यां·
ॐ यां कल्पयं नितर्जनीभ्यां· ॐ पीर्थ्यजनीमध्यमाभ्यां· ॐ येनदिष्टे अनामिकाभ्यां· ॐ गम्मिवन्नेस्वप्न कनिष्ठिकाभ्यां· ॐ यत्ना
कत्ये· करतलकर· एवं हृदयादि: तथथा मूलमन्त्रेण षडंगं कुर्यात् ॐ अथ ध्यानं सत्यब्रह्ममध्ये पुरुषं पुराणं सत्यात्मकं
घ्र

२० सर्वजगत्स्वरूपं ध्यायामि नित्यं परमात्मरूपं तं चिद्रूपमेकं प्रणवं नमामि ॥ अथ मुद्रा शंखं च चक्रं त्रिशूलं ।
च पाशपद्मौ एवमेव च ध्यात्वा नारायणं देवं कर्मारंभः ततः परं ॥ अथ उत्तरांगपूर्वं ध्यानं संचिन्त्य स्वाहुतो ।
भव स्वप्रतिष्ठितो भव ॥ अवगुंठितो भव ॥ आदौ अन्ते च प्राणानायम्य ॐ ॥ अं ह्रां ॥ आत्मतत्वं शोधयामि स्वा ।
हा ॐ उं ह्रीं परतत्वं शोधयामि ० ॐ मं ह्रूं परात्परतत्वं शोध० मूलमंत्रेण प्राणायामं कुर्यात् हृदये हस्तं दत्वा
देवीमां संरक्ष परक्षय भूत० १० अस्त्रादिकं संतारय २ मम अभयं कुरु एवं पीठपूजादिकं कृत्वा अथ वाहदू ।
यां दले पूजयित्वा विनागुरुं चास्त्रविद्यां प्रेषयंति नरः पुमान् घातकः स्वयमित्याह विश्वामित्रप्रकीर्तितं
अथ सर्वसाधारणेन गायत्रीउपासकेन जपित्वा अन्यथा निष्फलं चैव इति रुद्रेण भाषितं अथ गायत्रीन्या ।

20

सः ॐ भूः पादाभ्यां० ॐ भुवः जानुभ्यां ॐ स्वः कटिभ्यां० ॐ महः नाभ्यैः० ॐ जनः हृदयाय० ॐ तपः कंठा
य० ॐ सत्यं ललाटाय० ॐ वीजं एकशक्तिः नः प्राणा ध्यायेत्कीलकं ॐ तत्सवितुः अंगुष्ठाभ्यां० ॐ वरेण्यं
तर्जनीभ्यां० ॐ भर्गो देवस्य मध्यमाभ्यां० ॐ धीमहि अनामिकाभ्यां० ॐ धियो यो नः कनिष्ठिकाभ्यां० ॐ
प्रचोदयात् करतलकरपृष्ठाभ्यां० एवं हृदयादि ॐ तत्सवितुर्ब्रह्मात्मने हृदयाय० ॐ वरेण्यं विष्ण्वात्म
ने शिरसे स्वा० ॐ भर्गो देवस्य रुद्रात्मने शिखायै वषट् ॐ धीमहि मायात्मने कवचाय हुं ॐ धियो यो नः
कालात्मने नेत्रत्रयाय वौषट् ॐ प्रचोदयात् सर्वात्मने अस्त्राय फट् अथ पदाक्षरन्यासः ॐ तकारं पादां
गुलियोः सकारं गुल्फयोः ॐ विकारं जंघयोः ॐ तुकारं जान्वोः ॐ वकारं ऊर्वोः ॐ रेकारं गुदे ॐ णिका

२१ रंलिङ्गे ॐयंकारंकट्यां ॐभकारंनाभौ ॐर्गोकारंउदरे ॐदेकारंस्तनयोः ॐवकारंहृदये ॐस्यकारंकण्ठे ॐ
धीकारंमुखे ॐमकारंतालुमूले ॐहिकारंनासिकाग्रे ॐधिकारंनेत्रयोः ॐयोकारंभ्रूमध्ये ॐयोकारंललाटे ॐ
नःकारंपूर्वमुखे ॐप्रकारंदक्षिणमुखे ॐचोकारंपश्चिममुखे ॐदकारंउत्तरमुखे ॐयाकारंमूर्ध्नि ॐव्यजनंन्का
रंसर्वव्यापि इतिन्यासः ॥ अथध्यानं मुक्ताविद्रुमहेमनीलधवलै० इतिध्यानं ॥ अथमुद्रा सुमुखंसंपुटंचैव
विततंविस्तृतंतथा द्विमुखंत्रिमुखंचैव चतुःपञ्चमुखंतथा षण्मुखंचाधोमुखंचैव व्यापकाञ्जलिकंतथा शा
कटंयमपाशंचग्रथितंचोन्मुखंतथा प्रलम्बंमुष्टिकंचैव मत्स्यकूर्मवराहकं सिंहाक्रान्तंमहाक्रान्तंमुद्गरंप
ल्लवंतथा एतामुद्रानजानातिगायत्रीनिष्फलाभवेत् चतुर्विंशतिमुद्राश्चगायत्र्यादौप्रदर्शयेत् ॥ अथपातालतरा ॥

गायत्रीमेकवारं जपेत् ॐ तत्सवितुर्वरेण्यं॰ जातवेदसे सुनवाम॰ त्र्यम्बकं यजामहे॰ इति पादान्तरा ॥ अ
थ गायत्रीजपप्रकारः ॐकारं पूर्वमुच्चार्य भूर्भुवस्स्वस्तथैव च गायत्रीप्रणवान्तं च मध्ये त्रिःप्रणवं तथा
एवं नित्यजपं कुर्याद् ब्राह्मणो विप्रपुंगवः भिन्नपादा तु गायत्री ब्रह्महत्याप्रणाशनी ॥ अभिन्नपादा गायत्री
ब्रह्महत्यां प्रयच्छति ॥ अभिन्नपादां गायत्रीं जपं कुर्वीत यो द्विजः ॥ अधोमुखोऽश्नाति षष्टिकल्पकोटिशतानि
च संपुटैकादशोंकारो गायत्री त्रिविधा मता धर्मशास्त्रपुराणेषु इतिहासेषु सुव्रत पंचप्रणवसंयुक्तां जपे
दित्यनुशासनं ॥ अथ जपः ॐ भूर्भुवःस्वः ॐ तत्सवितुर्वरेण्यं ॐ भर्गो देवस्य धीमहि ॐ धियो यो नः प्र
चोदयात् ॐ। जपसङ्ख्याष्टभागेन पादोजाप्यस्तुरीयकः स द्विजः परमो देवः परं साफल्यमाप्नुयात् ॥ अ

२२ यथाप्रजपेद्यस्तु सजपोविफलो भवेत् संपुटे कोषडोंकारा भवेत्सांचोर्ध्वरेतसां ॥ गृहस्थोब्रह्मचारी वा मो
क्षार्थी चतुरीं जपेत् नित्ये नैमित्तिके काम्येषु सर्वदा चतुरीं जपेत् यथाशक्त्या त्रिपदा गायत्र्या ॥ अद्यमासे चतुरी
पपादसंपुटां गायत्रीजपमहं करिष्ये ॥ अथ न्यासः ॐ परो हृदयाय ॐ रजसे शिरसि ॐ सावदों शिखा ॐ प
22 रो रजसे कवचाय हुं ॐ असावदों नेत्रत्रयाय इति पंचाङ्गन्यासः ॥ अथ तुरीयाध्यानं हृदि विकसितपद्मे सा
र्के सोमार्कविंबं प्रणवमयमचिन्त्यं यस्य पीठं प्रकल्प्यं ॥ अचलपरमसूक्ष्मं ज्योतिराकाशसारं सभवतु मन सोपे
वास्करेवप्रतिष्ठः ॥ अथ मुद्रा त्रिशूलयोनिसुरभि अक्षमाला च लिंगकं ॥ अम्बुजं च महामुद्रा इति सप्त प्र
दर्शयेत ॥ अथ जपः ॐ भूर्भुवःस्वः ॐ तत्सवितुर्वरेण्यं ॐ भर्गो देवस्य धीमहि ॐ धियो यो नः प्रचोदयात् ॥

ॐपरोरजसेसावदों ॰अथउत्तरांगं ॐ॰आपोगुह्ये ॐज्योतिश्चक्षुषि ॐरसोमुखे ॐअमृतंजान्वोः ॐब्रह्मह
दयं ॐभूर्भुवःस्वरोंशिरसि इतिषडंगः ॰अथउत्तरध्यानं मूलाधारेहुतवहकुलेभूर्भुवःस्वैकरूपामूलध्या
नेधराशिकरकलितानत्सवितुर्वरेण्यं भर्गोदेवस्यमध्येसवितुस्सहृद्धाधीमहीत्येकरूपा धीयोयोनःपरमगहन
स्यप्रचोदयात्मरोंतो इतिध्यानं ॰अथपूजनं ॐलंपृथिव्यात्मकंगंधं॰ ॐहं॰आकाशात्मकंपुष्पं॰ ॐयंवायव्यात्म
कंधूपं॰ ॐरं॰अग्न्यात्मकंदीपं॰ ॐवं॰अमृतात्मकंनैवेद्यं॰ ॐ॰संयरं॰पुष्पांजलिं॰ ॰अथमुद्रा स्फुरदमितानम्र
कैवयोनिकूर्मोथपंकजे लिंगनिर्वाणमुद्राश्चजपान्तेषेप्रदर्शयेत् यदत्तरपद॰ नत्सर्वंक्षम्यतांदेवीकश्यप
पविपवाहिनी ॰अथगायत्रीतर्पणं गायत्र्यागायत्रीछन्दोविश्वामित्रऋषिःसवितादेवतागायत्रीछन्दःगाय

२३ त्रीतर्पयेत्वि· ॐ भूः ऋग्वेदपुरुषं त· ॐ भुवः यजुर्वेदपुरुषं· ॐ स्वः सामवेदपुरुषं त· ॐ महः अथर्व
णवेदपुरुषं त· ॐ जनः इतिहासपुराणं त· ॐ तपः सर्वांगपुरुषं त· ॐ सत्यं सप्तलोकपुरुषं त· ॐ भूः भूर्लो
कपुरुषं· ॐ भुवः भुवर्लोकपुरुषं त· ॐ स्वः स्वर्लोकपुरुषं त· ॐ महः महर्लोकपुरुषं त· ॐ जनः जनोलोक
23 पुरुषं त· ॐ तपः तपोलोकपुरुषं त· ॐ सत्यं सत्यलोकपुरुषं· ॐ भूः एकपदां गायत्रीं त· ॐ भुवः द्विपदां
गायत्रीं त· ॐ स्वः त्रिपदां गायत्रीं त· ॐ भूर्भुवः स्वः चतुष्पदां गायत्रीं त· ॐ उषसिं· ॐ गायत्रीं त· ॐ सा
वित्रीं· ॐ सरस्वतीं· ॐ वेदमातरं· ॐ पृथिवीं· ॐ अजां· ॐ कौशिकीं· ॐ सांकृतिं· ॐ सार्वजितं त· ॐ सहस्र
मूर्तिं· ॐ अनंतानंदं यैन· इति तर्पणं पश्चादुपस्थानं जपेत् जातवेदस इति मंत्रस्य मरीचः कश्यप ऋषिः जा

नवेद्गाग्निर्देवतात्रिष्टुप्छंदः शांत्यर्थेजपेवि· ॐजातवेदसे० मानस्तोके निकुत्सोरुद्रोजगती शांत्यर्थेज० ॐमानस्तो

के० त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप शांत्यर्थेजपे० ॐत्र्यम्बकंयजा० समनीवः संवननः संज्ञानमनुष्टुप शांत्यर्थेजपे·

ॐसमानीव·आकूतिः स० नक्षयोः शंपूर्विश्वेदेवाः शक्करी शांत्यर्थेजपे· ॐनक्षं योराद्रुणी· ॐश्चाये दिशोद्दृग्यन

मः ॐ·प्राग्नेये०·अग्नये· दक्षिणाये०यमाय०नैऋत्यै· निर्ऋतये· प्रतीच्यै· वरुणाय· ॐवायव्यै० वायवे० ॐदी च्यै· सो

माय· ईशान्यै· ईशानाय० ऊर्ध्वायै· ब्रह्मणे· अधरायै· आकाशाय० अंतरिक्षायै· पृथिव्यै· अतोदेवाइतिद्वयोः कां

ण्वोमेधातिथिर्देवाविष्णुर्गायत्री सर्वांगस्पर्शनेवि· ॐअतोदेवा० इदंविष्णु०स्योना पृथिवीमेधातिथिर्भूमिर्गायत्री

भूमिनमस्करणेवि· ॐस्योनापृथिवि· यदक्षरपदभ्रष्टमात्राहीनंचयद्भवेत तत्सर्वंक्षम्यतांदेवीकश्यपप्रियवादिनी

२४ ब्रह्मोच्चारः कार्यः॥ इति प्रातः संध्याविधिः॥ अथ मध्याह्नसंध्या॥ मध्याह्नसंध्यासावित्रीयूवतीश्वेतांगीश्वेताम्बराश्वेतव-
र्णांत्रिनेत्रांवरदाक्षमालात्रिशूलाभयहस्तांवृषारूढांयजुर्वेदसंहितांरुद्रदैवत्यांतमोगुणयुतांभुवर्लोकव्यवस्थितां
॥आदित्यपथगामिनीं॥ आवाहयाम्यहंदेवीमायांतीं सूर्यमण्डलात् शेषं पूर्ववत्॥ आपः पुनंत्वितिमंत्रस्य नारा-
25 यण ऋषिः॥ आपो देवता॥ अभीष्टीछन्दः॥ अपप्राशने विनियोगः॥ ॐ॥ आपः पुनन्तु॰ शेषं प्राग्वत्॥ अथ मध्या-
ह्नः॥ अर्घ्यप्रकारः॥ अर्घ्योदके कुङ्कुमामिनदलाभे बिल्वादिपत्राण्येवं कुशोदकमिश्राण्यञ्जलिनादायोत्थायोर्ध्वमुप-
रि सूर्याभिमुखं स्थित्वा॥ आकृष्णेनेति मंत्रेण अर्घ्यं दद्यात्॥ हंसः शुचिषदिति॥ असावादित्यो ब्रह्मेति प्रदक्षिणी-
कृत्य॥ अथार्घ्यप्रकारः॥ वारिणांजलिपूर्णेन गायत्र्या चाभिमंत्रितं यथा प्रातः पुनस्तद्वदुपसंहारपूर्वकं मध्या-

हेकेचिदिच्छन्तिसावित्रीमितिनदित्यर्च्यं ॰ अस्तंप्राप्ययत्कर्मकार्यंतन्निष्फलंजायते कार्यकारणंसंध्यायामंदेहा
नामराक्षसः ग्रसितुंसूर्यमिच्छन्तिकारणंस्फातिनोदितं ॰ अतःकारणविशेषंसंध्यांकुर्यात्स्वप्रयत्नतः मूलमं
त्रेणमध्याह्नेप्रक्षिप्तेनजलेनतुयः ॰ अपमृत्युनाद्विजःकश्चिद्द्विर्घ्यंदद्यात्स्वप्रयत्नतः सवितारघातितस्तेनरौरवंनर
कंव्रजेत् संध्ययोरुभयोर्नित्यंगायत्र्याप्रणवेनवा ॰ अम्भसंप्रक्षिप्तेनेननान्यथाअक्षतिपातकः ॰ आकृष्णेनेति
मंत्रेणपुष्पाःएवंतुविमिश्रितं ॰ आलाभेविल्वदूर्वादिसूत्रेणोक्तेनपूर्वकं उतायातंसंगविंशतिप्रदक्षिणंकृत्वा २
अर्घ्यानतर्पणं सावित्र्याःकश्यपऋषिःरुद्रोदेवतात्रिष्टुप्छन्दःतर्पणेवि॰ ॐभुवःपुरुषंत॰ ॐयजुर्वेदं॰
ॐमण्डलं॰ ॐ हिरण्यगर्भं॰ ॐ॰ परमात्मानं॰ ॐसावित्रीं॰ ॐवेदमातरं॰ ॐसांकृतिं॰ ॐसंध्यां॰ ॐयुवतीं॰ ॐरौ

२५ ह्रीं॰ ॐमध्याह्नीं॰ ॐनिमज्जिं॰ ॐसर्वार्थसिद्धिकरीं॰ ॐसर्वमंत्राधिपतिं॰ ॐभूर्भुवः स्वः पुरुषं॰ इतिमध्याह्न
संध्यातर्पणं॥ उदुत्यमितित्रयोदशर्चस्य सूक्तस्य कण्वपुत्रः प्रस्कण्व ऋषिः सूर्यो देवता नवाद्या गायत्री छन्दः
25 उद्वयंतमसः स्परीतिचतस्रोनुष्टुप् उद्यन्नद्येतित्रयंत्रिचोरोगघ्न उपनिषदं त्योर्द्धर्चे शोदिष्टनाशनी चित्रंदेवा
नामितिषलर्चस्य सूक्तस्य कण्वपुत्रः प्रस्कण्व ऋषिः सूर्यो देवता त्रिष्टुप्छन्दः सवितापश्चातात्ताना काल्लुगोवि
श्वेदेवा जगती अग्नेतोदेवता मेधातिथिर्भूमिर्गायत्री इदंविष्णुर्मेधातिथिर्भूमिर्गायत्री स्योनामेधातिथिर्भू
मिर्गायत्री जपेविनि॰ ॐउदुत्यं॰ १३ चित्रंदेवाना॰ ६ सवितापश्चाता॰ १ अग्नेदेवा॰ १ इदंविष्णु॰ १ स्योनापृथि
वि॰ १ ततोऽग्रासनादिदिग्बन्धांतंकुर्यात् ॐमित्येकाक्षरं ब्रह्मेत्यादिशेषंपूर्ववत् अथध्यानं मुक्ताविद्रुम॰ ॥

अथ जपविधिः कृत्वो स्नानकर्मौ प्रातःसायं चापोकर्मौ तथा मध्याह्ने हृदयस्थौ तु कृत्वा जपमुदीरयेत् पर्व।
द्वयमनामिकयांकनिष्ठादिक्रमेण तु तर्जनीमूलपर्यन्तं करमालाप्रकीर्तिताः अथ मनोमालाप्रकारः निश
षकुंभकं कुर्यात् प्रतिवर्णेन मूलमंत्रमुच्चार्य जपेत् तत्र क्रमः अं ॐ भूर्भुवः स्वः ॐ तत्सवितुर्व० ॐ। आं ॐ भू
र्भु० ॐ तत्सवितुः० एवं प्रकारेण इं ॐ भू० ॐ ईं ॐ भू० ॐ। उं ॐ भू० ॐ ऊं ॐ भू० ॐ ऋं ॐ भू० ॐ ॠं ॐ भू० ॐ
ऌं ॐ भू० ॐ ॡं ॐ भू० ॐ एं ॐ भू० ॐ ऐं ॐ भू० ॐ ओं ॐ भू० ॐ औं ॐ भू० ॐ अं ॐ भू० ॐ अः ॐ भू० ॐ
कं ॐ भू० ॐ खं ॐ भू० ॐ गं ॐ भू० ॐ घं ॐ भू० ॐ ङं ॐ भू० ॐ चं ॐ भू० ॐ छं ॐ भू० ॐ जं ॐ भू० ॐ झं ॐ
भू० ॐ ञं ॐ भू० ॐ टं ॐ भू० ॐ ठं ॐ भू० ॐ डं ॐ भू० ॐ ढं ॐ भू० ॐ णं ॐ भू० ॐ तं ॐ भू० ॐ थं ॐ भू० ॐ

२६ दं ओं मूः ओं · धं ओं मूः ओं · नं ओं मूः ओं · पं ओं मूः ओं फं ओं मूः ओं · बं ओं मूः ओं · भं ओं मूः ओं · मं ओं मूः ।
ओं · यं ओं मूः ओं · रं ओं मूः ओं · लं ओं मूः ओं · वं ओं मूः ओं · शं ओं मूः ओं · षं ओं मूः ओं · सं ओं मूः ओं · हं ओं मूः ओं ·
ळं ओं मूः ओं नमः ओं ५० हं · ळं ओं मूः ओं नमः ओं · हं ओं मूः ओं · सं ओं मूः ओं · षं ओं मूः ओं · शं ओं मूः ·
26 ओं · वं ओं मूः ओं · लं ओं मूः ओं · रं ओं मूः · यं ओं मूः · मं ओं मूः · भं ओं मूः · बं ओं मूः · फं ओं मूः · पं ओं मूः · नं ओं मूः ·
धं ओं मूः · दं ओं मूः · थं ओं मूः · तं ओं मूः · णं ओं मूः · ढं ओं मूः · डं ओं मूः · ठं ओं मूः · टं ओं मूः · ञं ओं मूः · झं ओं मूः · जं
ओं मूः · छं ओं मूः · चं ओं मूः · ङं ओं मूः · घं ओं मूः · गं ओं मूः · खं ओं मूः · कं ओं मूः · अः ओं मूः · अं ओं मूः · औं ओं
मूः · ओं ओं मूः · ऐं ओं मूः · एं ओं मूः · ॡं ओं मूः · ऌं ओं मूः · ॠं ओं मूः · ऋं ओं मूः · ऊं ओं मूः · उं ओं मूः · ईं ओं मूः · इं ओं मूः ·
· आं

॰प्रं ॐ भूः ॰प्रं ॐ भूः वितु॰ ॐ॰ १०० एवमकारादिलकारपर्यंतं कृत्वा मेरुस्थाने हकारं विचिन्त्य पु
नर्लक्षर्णां लकारादि॰ अकारांतं विलोम प्रतिवर्णसहितेन गायत्रीं जपेत् इमान्यक्षराणि १०० सकृ
न्मालानिःशेषकुम्भकेन कुर्यात् ॰अथवा पूरकेन कुर्यात् स च प्रकारः दक्षिणे रेचयेद्वायुं वामेना
पूरितोदरं कुम्भके धारयेन्नित्यं प्राणायामं विदुर्बुधाः एवंप्रकारेण सहस्रजपं कुर्यात् ॰अथवा श
तैकं जपेत् इति मनोमालाप्रकारः गोघ्नः पितृघ्नो मातृघ्नो भ्रूणहा गुरुतल्पगः ब्रह्मस्वहृत्स्वर्णहारी
चैव यश्च विप्रः सुरां पिबेत् स गायत्र्या सहस्रेण पूतो भवति मानवः मानसं वाचिकं पापं विषयेन्द्रियसं
जितं न किल्बिषं नाशयंति त्रीणि जन्मानि मानवः गायत्रीं यो न जानाति वृथा तस्य परिश्रमः पठप

२७ ते चतुरो वेदान् गायत्रीं चैकतः समः इति मत्वा हूं संध्या ॰अपः ब्रह्मयज्ञः त्रिः पिबेत् द्विः परिमृज्य
सकृदुपस्पृश्य सव्यं पाणिं पादौ प्रोक्षति शिरः चक्षुषी नासिके श्रोत्रे हृदयदेशमालभेत् ॰अप उपस्पृ
श्य इति श्रौताचमनप्राणायामप्रदेशकालौ स्मृत्वा देवदर्भौ दक्षिणोत्तरेण वामे त्रीण्यासनेन सकृत् उपवी
27 ते शिखायां च पादमूले सकृत्सकृत् दर्भं शुभ्रशाल्मलदारु निर्मितासनोपरि निहित प्रागग्रेषु कुशेषु प्रास॰
ने शुचौ प्राङ्मुखो दर्भपाणिः दर्भाः पवित्रोपग्रहव्यतिरिक्ताः पाण्योर्यस्य स दर्भपाणिः स्वाध्यायब्रह्म॰
यज्ञं कुर्यात् पूर्वोच्चरित॰ श्रीपरमेश्वरप्रीत्यर्थं देवर्षिपितृतुष्ट्यर्थं ब्रह्मयज्ञं करिष्ये इति संकल्प्य ओं भू
र्भुवः स्वः तत्सवितुः ॰अग्निमीळे पुरोहितं॰ २ वर्गद्वयं पठेत् ॰अग्निर्वै देवानामवमो विष्णुः परमः ॰अथ म॰

हाव्रतं एषपंथा एतत्कर्म ॥ अथातः संहितायाउपनिषत् विदामघवन्विदा महाव्रतस्य पंचविंश
तिं सामिधेन्यः एषवोऽर्जेना ॥ अग्न ॥ आयाहि वीतये शन्नोदेवीरभिष्टये ॥ अथैतस्य समाम्नायस्य स
माम्नायः समाम्नातः ए ओ ए · ऋ ऌ ऋ · वृद्धिरादैच् ॥ अथ शिक्षां प्रवक्ष्यामि पञ्चसम्वत्सरमयं म
परस्तनजभनलगसंमितं गोः ग्मा · योगीश्वरं याज्ञवल्क्यं नारायणं नमस्कृत्य ॥ अथातो धर्मव्या
स्यामः ॥ अथातो धर्मजिज्ञासा ॥ अथातो ब्रह्मजिज्ञासा तच्छंयोरावृणी · ॐ नमो ब्रह्मणे · शान्तिः शान्तिः
शान्तिः ॐ प्रजापतिस्तृप्यतु · ॐ ब्रह्मा तृप्यतु · वेदास्तृप्यन्तु · देवास्तृप्यन्तु · ऋषयस्तृप्यन्तु · सर्वाणि
छन्दांसि तृप्यन्तु · ओंकारस्तृप्यतु · वषट्कारस्तृप्यतु · व्याहृतयः तृप्यन्तु · सावित्री तृप्यतु · यज्ञास्तृ

२८ प्यंतु · द्यावापृथिवी तृप्येतां · अंतरिक्षं तृप्यतु · अहोरात्राणि तृप्यंतु · सांख्यास्तृप्यंतु · सिद्धास्तृप्यंतु · समु
द्रास्तृप्यंतु · नद्यस्तृप्यंतु · गिरयस्तृप्यंतु · क्षेत्रौषधिवनस्पति गंधर्वाप्सरसस्तृप्यंतु · नागास्तृप्यंतु · वयां
सि तृप्यंतु · गावस्तृप्यंतु स्तृप्यंतु · विप्रास्तृप्यंतु · यक्षास्तृप्यंतु · रक्षांसि तृप्यंतु · भूतानि तृप्यंतु · एवमं
28 तानि तृप्यंतु · अथ ऋषयः निवीती भूत्वा ॐ शतर्चिनस्तृप्यंतु · माध्यमास्तृप्यंतु · गृत्समदस्तृप्यंतु ·
विश्वामित्रस्तृप्यंतु · वामदेवस्तृप्यतु · अत्रिस्तृप्यतु · भरद्वाजस्तृप्यतु · वसिष्ठस्तृप्यतु · प्रगाथास्तृप्यं
तु · पावमान्यास्तृप्यंतु · क्षुद्रसूक्तास्तृप्यंतु · महासूक्तास्तृप्यंतु · सनकस्तृप्यंतु · सनंदनस्तृप्यतु · सनातन
स्तृप्यंतु · कपिलस्तृप्यतु · आसुरिस्तृप्यतु · वोढुस्तृप्यतु · पंचशिखास्तृप्यतु · प्राचीनावीती · ॐ सुमंतु

जैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यास्तृप्यंतु जानंतिबाहविगार्ग्यगौतमशाक-
ल्यबाभ्रव्यमांडव्यमांडूकेयास्तृप्यंतु· गार्गीवाचक्नवीतृप्यतु· वडवाप्रातीथेयीतृप्यतु· सुलभामैत्रेयी
तृप्यतु· कहोलंतर्पयामि· कौषीतकंतर्पयामि· महाकौषीतकंतर्पयामि· भरद्वाजंतर्पयामि· पैंग्यं
तर्पयामि· महापैंग्यंतर्पयामि· सुयज्ञंतर्पयामि· सांख्यायनंतर्पयामि· ऐतरेयंतर्पयामि· महैत
रेयंतर्पयामि· शाकुलिंतर्पयामि· शाकलंतर्पयामि· बाष्कलंतर्पयामि· सुजातवक्त्रंतर्पयामि· औ
दवाहिंतर्पयामि· महौदवाहिंतर्पयामि· सौजामिंतर्पयामि· शौनकंतर्पयामि· आश्वलायनंतर्प-
यामि· ये चान्ये आचार्यास्ते सर्वे तृप्यंतु· ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ते गृह्णंतु मया द

२८ त्रैसूत्रनिष्पीडलोदकमितिसांगंकृत्वा इतिब्रह्मयज्ञः ॥ अथसायंसंध्या ॥ आचम्यप्राणानायम्य तत्रप्रा
णायामविधिः सुबद्धपद्मपर्यंकउषःकालेस्थिरोभवेत् प्राणायामःसधूमेनधारयेत्तत्रचात्मनः वि
यो धूमंप्राणसं[illegible]यस्नानकर्मेतिकीर्तितं ॥ अग्निसम्मत्यादिकर्माहोसगर्भप्राणसंयमः ॥ सगर्भोध्यानमात्रेतु
29 ॥ अगर्भंतत्कीर्तितोद्विजैः ॥ मूलमन्त्रध्यानादिकंकृत्वानान्यथाकर्मकीर्तितं ॥ अथगर्भप्रकारः ॥ सहितःकेवलोध्या
त्वारेचकः पूरकुम्भकः ॥ कुंभकेनाप्यसहितंतुरेचःपूरकवर्जितः ॥ इत्यप्यसहितप्राणायामः ॥ निःशेषकुंभ
कंकुर्यात् हंसीचैवमृगीचैवखेचरीचतथैवच ॥ मुद्रात्रयंतुनियतंप्राणायामंप्रकीर्तितं ॥ तर्जनीमध्य ॥
माचैवलोकयंतुपरिस्थितः ॥ मृगीमुद्राचयेषांतुप्राणायामेत्रियामता ॥ हंसीचखेचरीचैवकुम्भकन्तत्र ॥

चाभ्यसेत् कर्मशास्त्रेषु योगे च ॥ आत्मानं दर्शयेद्बुधः ॥ अथ ध्यानं सायाह्ने संध्या सरस्वतीं वृद्धां कृशा
ङ्गीं कृष्णवाससां शंखचक्रगदापद्महस्तां गरुडारूढां सामवेदसंहितां सत्त्वगुणयुतां स्वर्लोकव्यवस्थितां ।
आदित्यपथगामिनीं ॥ आवाहयाम्यहं देवीमायान्तीं सूर्यमण्डलात् ममोपात्त दुरित० सायं संध्यामु० आपो
हिष्ठेति० ३ ॥ अग्निश्चेति मन्त्रस्य नारायण ऋषिः ॥ अग्निमन्यु मन्युपतयो देवता प्रकृतिश्छन्दः ॥ आचमने
वि० ॐ ॥ अग्निश्च मामन्युश्च० ॐ ॥ आपो हिष्ठेति० ॐ ऋतं चेति० ३ गायत्र्या गायत्री छन्दः ॐ ॥ अस्य श्री ।
ब्रह्मा ऋषि० गच्छ देवी० गायत्रीमन्त्रमुच्चार्य० श्रीसूर्यनारायणाय श्रीसरस्वत्यै इदमर्घ्यं न मम शेषं पूर्वव
त् ॐ मोघा १ ध्यद्धहणा वां० इति मन्त्रेण प्रदक्षिणं कृत्वा शेषं पूर्ववत् उभौ पादौ समौ कृत्वा हस्तौ कृत्वाञ्ज

३० तोंजलीन् जलमध्येजलंदद्यात्संध्यात्रयमितिक्रमात् ॥ अर्घ्यंदद्यात्तुयोनीरेमूढमन्याज्ञानवर्जितः ॥ उ
ल्लंघयेत्स्मृतिमंत्रानां प्रायश्चित्तीभवेद्द्विजः ॥ अंगुष्ठमूर्ध्वमाकृष्य तर्जनीमध्यमांचनस्थेशात् जलमध्येजलंदद्यि
त्वा॰ अर्घ्यंचक्षुजितोऽदितं ॥ अथार्घ्यप्रकारः वारिणांजलिपूर्णेन गायत्र्याचाभिमंत्रितं यथाशानःपुन
30 स्तद्दुपसंहारपूर्वकं सरस्वत्या वसिष्ठऋषिः विष्णुर्देवता सरस्वतिछन्दः सायाह्नसंध्यातर्पणेवि॰ ॐस्वः
पुरुषं॰ सामवेदं॰ मण्डले॰ हिरण्यगर्भं॰ परमात्मानं॰ सरस्वतीं॰ वैश्वानरं॰ सांकृतिं॰ संध्यां॰ रुद्रां॰ विष्णुरूपि ॥
णीं॰ उषसि॰ निम्रुजीं॰ सर्वार्थसिद्धिकरीं॰ सर्वमन्त्राधिपतिं॰ ॐभूर्भुवःस्वः पुरुषं॰ शेषंपूर्ववत् ॥ अथजप
विधिः ॐमित्येकाक्षरंब्रह्म इत्यादि ॐनमोब्रह्मणे॰ प्रतीच्यैदिशेवरुणाय॰ इत्यादिशेषंपूर्ववत् इतिविश्वा

मित्रकस्येत्रिकालसंध्याविधिस्समाप्तः ※ अथगायत्रीपुरश्चरणविधिरुच्यते तत्रपुरश्चरणंनाममन्त्र
सिध्यर्थमुपोद्घातत्वेनपूर्वसेवनं तत्रस्थानादिनियमविशेषफलमाह पर्वताग्रेनदीतीरेविल्वमूलेज
लाशये गोष्ठेदेवालयेश्वत्थेउद्यानेतुलसीवने पुण्यक्षेत्रेगुरोःपार्श्वेचित्तैकाग्र्यस्थलेपिच पुरश्चरण ।
कृन्मन्त्रीसिध्यत्येवनसंशयः यस्यकस्यापिमंत्रस्यपुरश्चरणमारभेत् पंचप्रणवसंयुक्तांगायत्रींचायुतं
जपेत् नृसिंहार्कवराहाणांतांत्रिकंवैदिकंतथा विनाजप्त्वातुगायत्रींतत्सर्वंनिष्फलंभवेत् सर्वेशाक्ता ।
द्विजाःप्रोक्तानशैवानचवैष्णवाः मूलमंत्रेतुसंशोध्यगायत्रीविद्यमानरं पंचदशाक्षरायुक्तापंचप्रणवपू
र्विकां शतनाहरान्तुसंयुक्तासहस्राहारपूर्वकं मंत्रंसंशोध्ययत्नेनपुरश्चरणमाचरं मन्त्रशोधनपूर्वांग ।

३१ आत्मशोधनप्रयत्नतः आत्मशोधनार्थं च लक्षत्रयं जपेद्बुधः अथवाप्यष्टलक्षं तु श्रुतिनोक्तेन पूर्वकं च
तुर्विंशतिलक्षं तु पात्रवत्स्यमतं न यथा भूमिरन्तरिक्षं द्यौरिति श्रुतिवचनात् अष्टलक्षं जपेत् ऋग्यजु
र्सामानीति वचनात् षोडशलक्षं जपेत् प्राणापानौ व्यान इति वचनात् चतुर्विंशतिलक्षं जपेत् किन्तु
वह्निर्याप्यं करोति उपनिषदे पूर्ववचनं लक्षत्रयमिति स्मृतिवाक्यं एवं विधानेन आत्मशोधनं कुर्यात् ।
आत्मशोधनानन्तरं मन्त्रशोधनं कुर्यात् स्त्रीशूद्रपतितानां च मन्त्रं श्रुत्वा यथाविधिः अन्तःकरणं विशुद्ध
मन्त्रशोधनमुत्तमं दशप्रणववर्णपूर्वकां गायत्रीं चायुतं जपेत् मन्त्रसिद्धिरतः पश्चात् जपेल्लक्षचतुष्टयं अ
धमतान्तरे आत्मसिद्धिं विना कर्तुं जपहोमादिकर्माणि निष्फलानि लालस. वित्तयाकारणं श्रुतिनोदितं तथ

सा शोधयेद्देहं पितृदेवांश्च तर्पयेत् तपसा स्वर्गमाप्नोति तपसा विंदते महत् क्षत्रियो बाहुवीर्येण तरे-
दापदमात्मनः धनेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तमः अतः कारणविप्रेन्द्र तपः कुर्यात्प्रयत्नतः ।
शरीरशोषणं प्राहुस्तापसास्तप उत्तमं शोषयेद्विधिमार्गेण कृच्छ्रचान्द्रायणादिभिः एवं विधिना श-
रीरशोषणं कुर्यात् अथ बालग्रावेपञ्चदशप्रणवसंपूक्तां पञ्चदशसहस्रं गायत्रीजपं कुर्यात् इत्या-
त्मशुद्धिप्रकारः अथ मन्त्रशुद्धिप्रकारो वक्ष्यते अयाचितैकभुक्तो वा भिक्षाशी वा चतुर्थं तान्त्रि-
कैर्वैदिकैश्चैव मन्त्रशुद्धिप्रकीर्तिता मन्त्रानुसारं कर्माणि बुधैः कर्मानुसारतः एवं विधानेन मन्त्र-
शोधनं कुर्यात् तत्र तपोयुक्तेन तापसेन क्षत्रियवैश्यशूद्रादिकादिभ्यः मन्त्रादिनम्रात्यं तपसा भवे

३२ न्यूर्वंमिताद्रिकाद्ग्रहस्यदिर्कैनुफलसंपर्कदोषात् ननुफलपाकस्यऐंदोषनिमित्ताद्रिकंफलस्यर्णमा
त्रेणानपोद्दहतिनिश्चितं नित्यंनैमित्तिकंकाम्यंसर्वंदहतिनिश्चितं मिताग्रंशुद्धमानीयकृत्वाभागच॰
तुष्टयं एकभागोद्विजानदत्वागोग्रासंतुद्वितीयकं ॰अतीप्येश्वनतीयंतुनदूर्ध्वंनैत्वैभार्ययो ॰आश्रमस्थ॰
यथायस्यकृत्वाग्रासविधिंक्रमात् ॰आदौहित्वानुगोमूत्रंयथाशक्तियथाक्रमात् ॰अतऊर्ध्वंग्रासस्य
वानप्रस्थगृहस्थयोः कुक्कुटाण्डप्रमाणन्तुग्रासमानंविधीयते ॰अष्टौग्रासग्रहस्थस्यवानप्रस्थेनदर्धकं ब॰
स्यचारीयथेष्टंचगोमूत्रंविधिपूर्वकं प्रोक्षणेनववारन्त्वषडारन्त्वत्रिवारकं निश्छिद्रंचकरंकृत्वासावित्रीचत
द्रिन्यच मंत्रमुच्चार्यमनसाप्रोक्षणंविधिरुच्यते इतिउक्तमन्मिताप्रकारः ॰अथमध्यमप्रकारोवक्ष्यते मिताया॰

नीयमा[illegible]त्रयं कृत्वा । प्रतिष्ठिगोग्रासं दत्वा पश्चाद् ब्राह्मणेन स्वयमेव भोजनं करोतीति सप्त॰कल्पितानां प्रकाराः षि-
तांत्रिविधामता । अथ । अथाग्निहोत्रमध्यमकनिष्ठप्रकारो वक्ष्यते यो रोवायद्विधांडालो ह्यग्निर्वैश्यस्य त्वपापि-
वा । अग्नेर्दयानुयः कश्चिद्यमोविधिरुच्यते शूद्रान्नं शूद्रसंपर्कं शूद्रेण च सहासनं तेषांनिनरकं घोरं यावच्च-
न्द्रदिवाकरौ ब्राह्मणेन त्रिविधा वैश्यं यद्वा अन्नं गृहीतं तत्तन्मध्यमं विधिरुच्यते यदा ब्राह्मणेन दत्तं तदा सा उत्तमः
तथया शुक्लवन्निर्भेद त्रयं उच्यते ब्राह्मणेर्दत्तं स उत्तमः शुक्लं शुक्लं तु यत् कृष्णं मोह मार्गे च जो यथा राजवैश्या-
दिकं शुक्लं मध्यमं परिकीर्तितं शूद्रादिकं तु यत् कृष्णं । अधमं परिकीर्तितं एवं विधिमार्गेण । अग्निसंयोध्य पश्चान्नु-
स्मरणं कुर्यात् गायत्रीछंदमंत्रस्य यथा सद्व्याहृतानि च तावत् तानि कर्तव्यं पुरश्चरणकं तथा द्वात्रिंशति

३३ तदहं तु विश्वामित्रमतं तं तथा जीवहीनो यथा देहः सर्वकर्मसु न क्षमः पुरश्चरणहीनं तु तथा मन्त्रः प्रकीर्तितः ।
ज्येष्ठाषाढौ भाद्रपदं पौषं तु मलमासकं अंगारशनिवारौ च व्यतीपातं च वैधृतं अष्टमी नवमी षष्ठी चतु
र्थी च त्रयोदशी चतुर्दशी अमावास्या प्रदोषं च तथा निशि यमाग्निरुद्रसर्पेन्द्रवसुश्रवणजन्मभं मेषक
र्कतुलाकुम्भमकरालिचलग्नकं सर्वाण्येतानि वर्ज्यानि पुरश्चरणकर्मणि चन्द्रतारानुकूल्ये च शुक्लप
क्षे विशेषतः पुरश्चरणकं कुर्यान्मन्त्रसिद्धिः प्रजायते स्वस्तिवाचनकं कुर्यान्नान्दीश्राद्धं यथाविधिः विप्रान्
संतर्प्य यत्नेन भोजनाच्छादनादिभिः आरम्भे च ततः पश्चात्तु तञ्च पुरःसरं प्रत्यङ्मुखः शिवस्याग्रे द्विज
स्तान्यमं जपेत् काशीपुरी च केदारे महाकाले च नासिके त्र्यम्बकं च महाक्षेत्रे पञ्च दीपा इमे भुवि एतेषु स

33

वेनोर्हीयाकूर्मासनमिनस्तथा प्रारम्भदिनमारभ्यसमाप्तिदिवसावधिः न्यूनं नातिरिक्तं च जपं कु
र्याद्दिनेदिने नैरंतरेण कुर्वीत स्वस्ववर्जिं नलिप्यते प्रातरारभ्यविधिवज्जपेन्मैध्यंदिनावधि मनःसंह
रणं शौचं ध्यानं मन्त्रार्थचिन्तनं गायत्रीछन्दमन्त्रस्ययथासंख्याक्षराणि च तावल्लक्षाणि कर्तव्ये पुर ।
श्चरणकं तथा विश्वामित्रोक्तं षिश्चैवरैत्यनुष्टुप्प्रमुच्यते तर्पयेत्तद्दशांशेन तद्दशेन पयोम्भसा ति
लैः प्रसन्नैश्च यवैश्च मधुराप्लुतैः कुर्याद्दशांशतो होमं ततः सिद्धो भवेन्मनुः गायत्रीं संप्रवक्ष्यामि धर्म
कामार्थमोक्षदं नित्यनैमित्तिककाम्येन नीयेति परायणं गायत्र्यास्तु परं नास्ति इहलोके परत्र च मध्या
ह्ने मितभुग्मौनी त्रिस्नानार्चनतत्परः जपेल्लक्षत्रयं धीमान् ध्यानन्यासमानसक्रिया क्रमेण योजपेत्तस्य ज्ञात

३४ कर्मभिः स्वेच्छयापि वा यावत्कार्यं तु कुर्वीत प्रयत्नतः तत्समाचरेत् ॥ अथ मतान्तरे सामान्यकाम्यकर्मादि-
विधिरुच्यते ॥ आदित्यउदयेस्नात्वा सहस्रं प्रत्यहं जपेत् ॥ आयुरारोग्यमैश्वर्यं धनं च लभते ध्रुवं षण्मासं
च त्रिमासं वा वर्षान्ते सिद्धिमाप्नुयात् ॥ अथ मतान्तरे महासिद्धिप्रकारः पद्मानां लक्षहोमेन घृताक्तानां
हुताशने प्राप्नोति निखिलं मोहं सिद्धित्वेन न संशयः मंत्रसिद्धिं विना कर्तुं जपहोमादिकाः क्रियाः काम्यं वा
यदि वा मोहं सर्वं तं निष्फलं भवेत् पञ्चविंशतिलक्षेण पृथिवीं हुताशने स्वदेहे सिध्यते जंतुः कौशिकस्य म-
तं यथा ॥ अष्टांगयोगसिद्धिः स्यान्नरः प्राप्नोति यत्फलं तत्फलं सिद्धिमाप्नोति नात्र कार्या विचारणा मतान्तरे
॥ अन्यत्र ॥ अनुष्ठानं ॥ अशक्तो वापि शक्तो वा आहारं नियमं कृत्वा षण्मासान्नस्य सिद्धिः स्याद्गुरुभक्तिरतः सदा

34

एकाहं पंचगव्याशी एकाहं माहताशनः एकाहं ब्राह्मणान्नाशी गायत्रीजप उच्यते मन्वन्तरे स्नात्वानुर
शगायत्र्याशतमंतर्जलेजपेत् शतेनापतप्तः पीत्वा सर्वपापैः प्रमुच्यते चांद्रायणादिकृच्छ्रस्य फलं प्रा
प्नोति निश्चितं रात्रौ वा यदि वा विप्रस्तपः कुर्यात्स्वयंगृहे गृहस्थो ब्रह्मचारी वा वानप्रस्थस्तथापि वा ऽत्र
धिकारपरत्वेन फलं यत्तादिपूर्वकं श्रौतस्मार्त्तादिकं कर्म क्रियते मोहतकोहितिभिः श्रुतिबलवत्तरवचना
त् ऽअनुकूलपरार्थेन यत्कार्यं भार्यया सह ऽअनाश्रमेण न तपः क्रियते यदि ऽअनग्निकस्य स्पर्शात्सचैलं
स्नायादितिवाक्यप्रमाणं साग्निकस्थः सदाचारो विशुद्धिश्च कलिहकः तपः कुर्यात्प्रयत्नेन फलमूलो
दकादिभिः मिष्टान्नं शुद्धमानीय ब्राह्मणांश्च भोजयेत् न यथा पञ्चमहायज्ञविधिपूर्वकेन कुर्यात् ऽप्र

३५ थवैश्वदेवप्रकरणं पूर्वोक्तविधिनइतिनदंगस्थण्डिलउपलेपनउल्लेखनादिकंकुर्यात् एह्यग्नेतिमंत्रे॰
णऽआवाहनंकुर्यात् चत्वारिशृंगेतिध्यात्वापरिसमुह्यऽअन्वाधानं देवयज्ञब्रह्मयज्ञभूतयज्ञपितृयज्ञ
35 मनुष्ययज्ञवैश्वदेवकर्मणायक्ष्ये तत्रप्रथमंदेवयज्ञेनयक्ष्येतत्रसूर्यादयोदशदेवतामथवाऽग्न्या
दिदशदेवता अथवाउभौदेवता अमुकद्रव्येण तत्रचतस्रोव्याहृताःसर्वाःसन्निहिताःसंतुएवंसांगोपां
गेनकर्मणासद्योयक्ष्ये ॐभूर्भुवःस्वःस्वाहा प्रजापतयइदंनममेत्यग्निमध्येसमिधंनिक्षिप्यपर्यग्निकर॰
णादिकंकुर्यात् ॐसूर्यायस्वाहेतिदशाहुति व्याहृतिचतुष्टयं एकतंत्रेणयद्वाकर्तव्यंतत्रऽअग्न्यादिदशाम
ग्निंपरिसमूह्य चतुर्भिर्व्याहृतिभिःपुनरग्निपरिसमुह्यऽअग्नऽआपकवीर्यादिउपस्थाय अथगृहबलिदेवता॰

नामित्यादिविधिपूर्वकेन बलिं दद्यात् तदा दैवबलिहरणं संप्रदायेन कुर्यात् हस्तौ पादौ प्रक्षाल्य इति पितृय
ज्ञादिकं समाप्य आचम्य प्राणानायम्य अग्निप्रिया श्रीपादप्रक्षालनपूर्वकं गंधमाल्यादिभिरभ्यर्च्य अन्नं
परिवेष्य हंत ते नमिदं मनुष्यायेति संकल्प्य तमाशयेत् तदभावे षोडशग्रासपरिमितं चतुर्ग्रासपरिमितं
वा अन्नं पात्रे कृत्वा निवीभूतो दक्षिणामुखोपविष्टो हंत तेऽन्नमिदं मनुष्यायेति संकल्प्य कस्मैचिद् ब्राह्मणाय दद्यात् ।
मनुष्ययज्ञसिद्धये ततो नित्यश्राद्धं कुर्यात् तद्यथा स्वागतवचनेन षट् ब्राह्मणान् द्वौ एकं वाभ्यर्च्य पा ।
दौ प्रक्षाल्याचम्य गृहं प्रविश्य कुशान्तर्हितेष्वासनेषु उदङ्मुखानुपवेशयेत् ततः स्वयमाचम्य प्राङ्मुखोपविश्य
पुण्डरीकाक्षं श्रीवासुदेवं च संस्मृत्य सपवित्री पठित्वा अद्येत्यादि देशकालौ स्मृत्वा प्राचीनवीती दक्षिणामुखः स

३६ यंजान्वाचय ॰अमुकशर्मणां ॰अमुकगोत्राणां ॰अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां ॰अमुकशर्मणां नि
त्यश्राद्धं करिष्ये इति प्रतिज्ञाप्य नित्यश्राद्धं कुर्यात् ततो यदा हि पितृभ्योऽन्नं विभज्य वालग्न्येहं चसंगराय यथा
योग्यमश्नीयुः ततो जायापतिरश्नीतः पूर्वो वा गृहपतिः पत्नी तेतिप्यादि नाशयित्वाश्नीयात् ॰अथ वैश्वदेवनि
यमः पंचसूना गृहस्थस्य चुल्ली पेषण्युपस्करः कंडनी चोदकुंभश्च तेषां पापापनुत्यै शान्तये न चुल्लीनाय स पात्रेन म
मौन चरवणे वैश्वदेवं प्रकुर्वीत कुण्डे वाथ स्थण्डिले पिवा न पात्रे न च वस्त्रेण न शूर्पे व्यजनादिषु मुखेनोपधमे
दग्निं मुखाद्ध्येषोभिजायते पटकेन भवेद्व्याधिः शूर्पेण धननाशनं पाणिना मृत्युमाप्नोति कर्मसिद्धिर्मुखेन तु ।
फलैर्दधिघृतैः कुर्यात्फलं शाकोदकादिभिः ॰अलाभे येन केनापि काष्ठमूलतृणादिभिः ज॰हुयात्सर्पिषाभ्यक्तं तैस

क्षारविवर्जितं । दध्याक्तं पयसाक्तं वा न द्याद्वैश्वं भसापि वा शुष्कैः पर्युषितैः कुत्सितैः भिन्नैर्दूषितैर्वा नी हारै
रिद्गनाया निहारं हुत्वाग्नौ जलमथ । मुद्गमाषादिकेनैव यवसस्यैर्गोधूमकोद्रवैः छिन्नधान्यं तथा चैव एषन्नाराग
णः स्मृतः । अंगारान् भस्मसंमिश्रान् निर्हृत्याग्नौ समेनस्तान् जुहुयाद्वैश्वदेवं तु यदि स्याद्ग्रामसंस्थितं । अकृत्वा
वैश्वदेवं तु यो भुंक्ते च यदि द्विजः समूढो नरकं याति कालसूत्रमथाविशत् शाकं वा यदि वा पत्रं मूलं वा यदि वा
फलं संकल्पयेद्यदाहारस्तेनाग्नौ जुहुयादपि । अकृते वैश्वदेवं तु भिक्षौ भिक्षार्थमागते उद्धृत्य वैश्वदेवार्थं भि ।
क्षां दत्वा विसर्जयेत् वैश्वदेवाकृते दोषं शक्तो भिक्षुर्व्यपोहतु न तु भिक्षुकृते दोषं वैश्वदेवो व्यपोहति यतिश्च ब्रह्म
चारी च पक्वान्नस्वामिनावुभौ तयोरन्नमदत्वा तु भुक्त्वा चान्द्रायणं चरेत् इति वैश्वदेवः । अथ गोग्रासः स्कन्द ।

३७ भिर्वैश्रवीमानानि स्त्रविष्णुपदे स्थिता गोग्रासं च मया दत्तं स्वकरेभिः प्रतिगृह्यतां गोभ्यो नमः इदं गोग्रासनमम ।
७२ संहरणेवि॰ ॐ सोहमर्कपरं ज्योतिरर्क ज्योतिः परं शिवः आत्मज्योतिरहं शुक्लं ज्योतिरसोऽस्म्यहं ॥ प्राचाय व्ययाचा
यव्याचायचाया व्ययव॰ग्रा ॥ ऊर्ध्वाय व्ययावायव्या ॐ वायव्ययावायव्यो सि पाप्मानं मे छिंधि सवितासि पाप्मानं मे
छिंधि ॐ सवित्रे ॐ ब्रह्मणे ॐ शाश्वते ॐ कर्मदायिने ॐ विश्वरूपिणे ॐ जगत्सवित्रे ॐ शुचये ॐ भास्करा
72 य॰ एभिर्नाममंत्रैः स्वदेहोपरि अक्षतान् निक्षिप्य तदुपरि योगमुद्रां प्रदर्श्य देवतारूपं भावयेत् हृदये हंसं दत्वा देवी
मां संरक्षय सर्वविघ्नान् नाशय नाशय मन्त्रेण ॥ १ ॥ आसहस्रात् दशनात् द्वादशाद्वादशवा जपेत् प्रत्यहं जपं कुर्वीत महा कु॰
लान तपोधन नान्यथा सिद्धिमाप्नोति अथ पाशुपतेक्तं रक्षा कृतं तु सामर्थ्यादकं नारायणेन तथा इति रक्षाम॰
करणे॰ अक्षविधानं ** अथ शाप विमोचनं अस्य श्रीब्रह्मशाप विमोचनमंत्रस्य निग्रहानुग्रहकर्त्ता प्रजापतिर्

राम

षिः शक्तिर्देवता गायत्री छन्दः ब्रह्मशापविमोचनार्थे जपे वि॰ ॐ गायत्रीं सततं भजामि विश्वगर्भानुपस्मिन्दे-
वानां नान्यमनायेन ॥ अग्नेनां प्रजापतिमारुतं नः शक्तिः सावित्रीं भजे विश्वमाद्यं सृजन्ती ब्रह्मशापविमुक्ता भव । अस्य
श्रीविश्वामित्रशापविमोचनमंत्रस्य निग्रहानुग्रहकर्ता विश्वामित्र ऋषिः शक्तिर्देवता गायत्री छंदः विश्वामि-
त्रशापविमोचनार्थे जपे विनि॰ ॐ गायत्रीं सततं भजामि कमुखीं विश्वगर्भां यदुद्भवा देवाश्चक्रिरे विसृष्टिः यत्कृस्या-
ली॰ अभिषिक्तकरी प्रपपेय मुखीं नमस्येवीनवेदगर्भा विश्वामित्रशापविमुक्ता भव ॥ अस्य श्रीवसिष्ठशापविमोचनमं-
त्रस्य निग्रहानुग्रहकर्ता वसिष्ठ ऋषिः शक्तिर्देवता गायत्री छन्दः वसिष्ठशापविमोचनार्थे जपे वि॰ ॐ अहो महा-
विश्वरूपे दिव्ये संध्ये सरस्वती ॥ अजरे अमरे चैव ब्रह्मविद्ये नमोऽस्तु ते वसिष्ठशापविमुक्ता भव ॥ अथ गायत्री अस्त्रं ज

७३ येन् ॐयांकल्पयंतिनोरयः क्रूरांकृत्यांवधूमिव नयाद्धचोप्रनः योयोधियिहिमधीस्यवदेर्गोमयंणियंरेर्वेनुविस्सनत्व
वेः भुर्भूरोम् तांब्रह्मणापनिर्णुद्मः प्रत्यः कर्त्तारमृछतु हनहनहुंफट् इतिब्रह्मास्त्रं ॐशीर्षण्वंतीकर्णवंतीविश्वरूपां
73 मयंकरीं प्रचोदयात्नोयोधियोधीमहिदेवस्यभर्गोवरेण्यंसवितुस्तत् यः प्राहिणो द्धिहाघत्वांविनत्वंयोजयाम्यधिः
हनहनहुंफट् इत्याग्नेयास्त्रं ॐयेनद्विष्टं हवदसि प्रतिकूलमघापिनी धियोयोनः प्रचोदयात् भर्गोदेवस्यधीमहि
तत्सवितुर्वरेण्यं तमेवतोनिवर्त्तस्वमस्मान्दोषोऽप्यनागसः हनहनहुंफट् इतिनारायणास्त्रं ॐऽग्रमिवर्त्तस्वक
र्त्तारंनिरस्तात्स्वाभिरोजसा देवसासेजरारोपनयाद्धचोप्रनोयोयोधियिहिमधीस्यवरेर्गोभणियंरेर्वेनुविन्सनवः स्व
वः भुर्भूरोम् ऽप्यायुरस्यनिकृंतत्स्वप्रजांचपुरुषादिनि हनहनहुंफट् इतिपाशुपतास्त्रं ॐयत्त्वाकृत्येचकारेह

ततत्वंगच्छपुनर्यथैव ऽआवाययथावायव्यावायवायाव्यवयऽया ऽऔर्वाययथागायव्या ऽपरातीन्कु-
ल्पेनाशायसर्वाश्रयानुभान्यः तिष्ठंकृत्येनिवर्तनेस्व हनहनहुंफट् इतिवायवास्त्रं ॥ ऽअत्रध्यानमुद्रादि-
कंनकुर्यात्प्रयोगसंहरणमात्रंकार्यं इदंसर्वंमहाकृत्यादिवायव्यास्त्रांतंवैदिकमंत्रपुरश्चर्यायांकृताकृतं स्व-
तंसिद्धप्रकाशत्वात पौराणिकागमोक्तमंत्रपुरश्चर्यायां ऽआवश्यकमेव ततः शतात्तरागायत्रीमेकवारंजपेत्-
तथा ऽअस्यश्रीशतात्तरागायत्रीमंत्रस्यविश्वामित्रमरीचिःकश्यपवसिष्ठऋषिभ्योनमःशिरसि गायत्री-
त्रिष्टुबनुष्टुप्छंदेभ्योनमःमुखे सविताजातवेदसत्र्यंबकदेवताभ्योनमइतिहृदये गायत्र्यत्तराणिबीजानिगु-
ह्ये त्रिष्टुबत्तराणि शक्तयेनमःपादयोः ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि हृदयायनमः ॐधियोयोनः

७४ प्रचोदयात् शिरसे स्वाहा ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः शिखायै वषट् ॐ स नः पर्षद
ति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः कवचाय हुं ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं नेत्रत्रयाय वौ
74 षट् ॐ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् अस्त्राय फट् अथ ध्यानं सर्वव्यापि ललोक वर्त्तिसत
नेत्रत्रंगमत्यावरं यान्तिये चपन्च पंचविहितं मुक्तिश्रयन्तिध्याति यदास्याम्बुजोवत्रि भेदगहने ष्ठान्वा चय
दीयते तद्धं कृत्तिजिसिद्धये स्ववरदं ज्योतिस्त्रयो संमहः एवं ध्यात्वा गणनातारां जपेत् ॐ तत्सवितुः॰ जातवेद
सेसु॰ त्र्यंबकं यजा॰ इति शान्तातराविधिः अथ चतुर्विंशत्यक्षरा गायत्रीपुरश्चरणकृते तदा तुरीयपादस्य जू
कुमां शाविधिः प्रणवं पूर्वमुच्चार्य भूर्भुवः स्वस्ततः परं पादादौ प्रणवोच्चार्य पादान्ते प्रणवोच्चरेत् प्रणवत्रय

संपूर्णां त्रिवीजसंपुटां जपेत् ॥ अन्यथा जपमानस्य निष्फलं कौशिकोऽब्रवीत् जपसंख्याष्टभागांते पादे
नाप्यलरीयकः सद्विजः प्राप्नोति योपां सायूज्यमाप्नुयात् ॥ अन्यथा प्रजपेद्यस्तु स जपो विफलो भवेत् नि
त्यनैमित्तिककाम्ये सर्वदा चतुरीं जपेत् त्रिपदा गायत्र्या विश्वामित्र ऋषिः चतुर्थपादस्य विमल ऋषिः गा
यत्री छन्दः ब्रह्मविष्णुरुद्रपरमात्मा देवता तत्सवितुर्वरेण्यमिति बीजं भर्गो देवस्य धीमहीति शक्तिः धि
यो यो नः प्रचोदयादिति कीलकं परो रजसे सावदोमिति व्यापकं तुरीयपादयुक्ता गायत्री द्वात्रिंशत्यक्षरा
णि चतुष्पदा अष्टकुक्षिः सप्तशीर्षोपनयने वि॰ यथाधान्यात्रिपदा गायत्री जपसंख्या अष्टमांसेन तुरी
यपादयुक्ता गायत्रीं जपेत् ॐ परो हृदयाय शेषं नित्यवत् अथ उत्तरध्यानं मूलाधारे हुतवहकुले भर्भुव

७५ स्यैकरूपांमूलस्थानेशशिकरकलितानन्तसवितुर्वरेण्यंभर्गोदेवस्यमध्येसवितुसदृशंधीमहीत्येकरूपां॰
धियोयोनःपरमगहनःस्वप्रचोदयान्यरांतां ॰अथस्तवनं नकुलपरमंनित्यं ध्येयंयत्सूर्यमंडलेस
वितुःसकलोत्पत्तिस्थितिसंहारकारिणी १ वरेण्यमाश्रयेण्ययदाधारमिदंजगत् भर्गस्यसाहाय्यका
रणानद्विघाकार्यदाहकं २ देवस्यज्ञानरूपस्यस्वानंदक्रीडतोपिच धीमहिःसर्ववेत्तावेत्तितेनैकंमेदसि
द्धये ३ धियोनःकरणंवृत्तिप्रवृत्तिप्रणवचारिणी योऽहंत्यैकरूपत्वादहंब्रह्मास्मिनिश्चितं ४ नोस्माकंवहु
धाभ्यस्वभेदेनानेनसिद्धये प्रचोदयात्प्रेरयितुंप्रार्थनीयंविशिष्यते ५ इतिगायत्रीपुरश्चरणविधानंस
माप्तं ॰अथनित्यविधानंलिख्यते ॰अथउषःकालादारभ्यआत्मचिंतनादिकंकृत्वानदीतीरेनित्यंसंपा॰

75

राम

घृततोयस्त्वंगच्छेत् ततोद्वारिणापारपूर्वकं जपवेदिकायां प्रविश्य सिद्धपीठवेदिकायां देवतां ध्यात्वा ॥ अथ
नित्यनित्यादिकं सर्वतोभद्रं विलिख्य ॥ अथवा भूर्जपत्रादिकं सिद्धपीठदेशाचारमतान्तरे ॥ अनुकूलेन ताम्र
पात्रादिकं धातुमूर्त्यादिकं मुख्यमतं ॥ अशक्तौ भावे देशाचारप्रकारेण कुर्यात् तत्र ध्यानोक्तः आवाहनादि
षोडशोपचारैः पूजयेत् पञ्चाशन्मीलितोपचारैस्तदुपरि योगमुद्रादिकं प्रदर्श्य ४ गुरुसंप्रदायप्रकारेण
मानसपूजां कुर्यात् तदुपरि गायत्रीहृदयं एकवारं पठेत् ॥ अथ गायत्रीहृदयं नमस्कृत्य भगवान् याज्ञव॰ ल्क्या
ल्क्यः स्वयंभुवं परिपृच्छति त्वं नो ब्रूहि भगवन् गायत्र्युत्पत्तिं तुरीयं तां तु मिच्छामि ब्रह्मतानोत्पत्तिं परिष्व श्रो
च्छामि श्रीभगवानुवाच प्रणवेन व्याहृतयः प्रवर्तन्ते तमसं ज्योतिः पुरुषः स्वयंभूर्विष्णुरिति ॥ अथाहं पञ्चाङ्गु॰

सस्तुरीयं

७६ स्यामथ्यतेमथ्यमानात्फेनोभवति फेनाद्बुद्बुदोभवति बुद्बुदादंडोभवति अंडादात्माभवति अंडादाकाशो
भवति आकाशाद्वायुर्भवति वायोरग्निर्भवति अग्नेराकारोभवति आकारादुकारोभवति उकारान्
76 मकारोभवति मकारादर्धमात्राभवति अर्धमात्रांतमेकथानदोंकारोभवति ॐकाराद्वषट्कारोभ
वति वषट्काराद्व्याहृतिर्भवति व्याहृत्यागायत्रीभवति गायत्र्यास्सावित्रीभवति सावित्र्यास्सरस्वती
भवति सरस्वत्यास्तुरीयाभवति तुरीयाद्वेदोभवति वेदेभ्योब्रह्माभवति ब्रह्मणोलोकाभवंति तस्माल्लो
काःप्रवर्त्तंते चत्वारोवेदाःसांगाःसोपनिषदाःसेतिहासाःसपुराणास्तसर्वेगायत्र्याःप्रवर्त्तंते अथाग्निर्दे
वानां ब्रह्मणोमनुष्याणां मेरुःशिखरिणां गंगानदीनां वसंतोऋतूनां ब्रह्माप्रजापतीनां एवंमानामु

ख्यामनुष्याणां गायत्री गायत्र्यागायत्रीछन्दोभवति ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ।
ॐसत्यं ॐभूर्भुवःस्वः ॐतत्सवितुर्वरेण्यं ॐभर्गोदेवस्यधीमहि ॐधियोयोनःप्रचोदयात् ॐपरोरज ।
सेसावदों ॐआपोज्योतीरसोमृतंब्रह्मभूर्भुवस्स्वरों। याज्ञवल्क्यउवाच किंवरेण्यं किंभर्गः किंदेवस्य ।
किंधीमहि किंधियः किंयः किंनः किंप्रचोदयात् किंपरः किंरजसे किंसावदों किंआपः किंज्योतिः किंरसः
किंअमृतं किंब्रह्म किंभूर्भुवः किंस्वरों। ब्रह्मउवाच भूरितिभूर्लोकः भुवइत्यन्तरिक्षलोकः स्वरितिस्वर्लो
कः महरितिमहर्लोकः जनरितिजनोलोकः तपरितितपोलोकः सत्यमितिसत्यलोकः तदितितेजः तेजसो ।
ऽग्निर्देवता सवितुरितिसविताऽऽदित्यवैरेण्यं वरेण्यमित्यत्रं ऽअन्नमेवप्रजापतिः भर्ग इत्यापोवैभर्गः

७७ यस्यापत्नीस्सर्वा देवता देवस्येति यो वै देवो यः पुरुषः स विष्णुः धीमहि इत्यैश्वर्यं धीयि ऐश्वर्यं तन्महेश्वरः धि।
यइति स प्राणो वै वायुरित्यध्यात्मं तत्परमं नइति पृथ्वी इयं योनिः प्रचोदयादिति कामं कामायमिमं ॥
लोकाः प्रत्याचक्षते परइति परमं लोकं परान् लोकमेकोत्तरशतं पितरं रजसे इति रजसयो गोइति एका।
दशारुद्रा विश्वेदेवाः सावदोमिति ब्रह्मा आपइत्यप्सरोलोकः ज्योतिरिति गन्धर्वलोकः रसइति किंनरलोकः।
अमृतमिति ब्रह्मलोकः सत्यमिति सत्यज्ञानमनन्तं ब्रह्म भूर्भुवस्वरोमिति त्रैलोक्यं ओं तत्सत्परं ब्रह्म तस्मा।
त् अप्यसंशयो नस्यात् तत्परमो धर्मः इत्येषा वै गायत्री याज्ञवल्क्य उवाच अथ गायत्र्याः किं गोत्रं कत्य
क्षराणि कति पदानि कति शीर्षाणि कति कुक्षयः ब्रह्मोवाच सांख्यायनसगोत्रं द्वात्रिंशत्यक्षराणि चतुः

षदा वै गायत्री कश्चित्तृतीयपदा चतुर्विंशत्यक्षरा वै गायत्री भवति अष्टकुक्षयः सप्तशीर्षाणि भवं
ति ऋग्वेदोस्याः प्रथमपादो भवति यजुर्वेदो द्वितीयः सामवेदस्तृतीयः अथर्ववेदश्चतुर्थः पूर्वा
दिक् प्रथमा कुक्षिर्भवति दक्षिणादिग्द्वितीया कुक्षिः पश्चिमादिक् तृतीयकुक्षिः उत्तरादिक् चतुर्थकु
क्षिः ऊर्ध्वादिक पंचमी कुक्षिः अधरादिक् षष्ठी कुक्षिः अंतरिक्षादिक सप्तमी कुक्षिः आवांतरादिक् अष्टमी
कुक्षिः व्याकरणमस्याः प्रथमं शीर्षं भवति शिक्षा द्वितीयं कल्पस्तृतीयं निरुक्तं चतुर्थं ज्योतिषंनयनं
मिति पंचमं इतिहासपुराणानि षष्ठं उपनिषदमिति सप्तमशीर्षं भवति याज्ञवल्क्य उवाच किं लक्षणं
किं चेष्टितं किं मुदाहृतं ब्रह्मोवाच लक्षणमिमासावेदं तो वै अथर्ववेदं तो वै चेष्टितं छंदो वै जित्यमु

७८ ऽहं तं याज्ञवल्क्य उवाच के स्वराः कानि बीजानि वत्स उ॰ उदात्तानुदात्तस्वरितप्रचयसमन्वितकंपविसर्गाः
सप्तस्वराः अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः कं ५ चं ५ टं ५ तं ५ पं ५ यं ८ इमान्यक्षरा
णि बीजानि भवंति याज्ञ॰ व्याहृतीनां सप्तानां ऋषयश्छन्दांसि देवताः वर्णाः स्वरा बीजानि श्रोतुमिच्छा
मि वत्स॰ सप्तानां व्याहृतीनां विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः गाय
त्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छन्दांसि अग्निर्वायुः सूर्यो मित्रावरुणौ इन्द्रो विश्वेदेवा देवता श्वे
तश्यामनीललोहितपीतपिशंगकनकवर्णाः षड्जऋषभगांधारपंचमधैवतमध्यमनिषादस्वराः पृथि
व्यप्तेजवायुराकाशदिगात्मनो बीजानि याज्ञवल्क्य॰ कति शाखाः कति तत्त्वानि कत्यग्नयः कति मुद्राः कति फला

78

राम

नि ब्रह्म उ० श्रीकीर्तिर्माया धृतिर्मेधा स्मृतिर्वाच: शक्तय: शब्दस्पर्शरूपरसगंधमनोबुद्ध्यहंत्वानि ८
आहवनीयगार्हपत्यदक्षिणाग्नि आवसथ्यसभ्यसंवर्तवडवाग्नय: वितनमांजलिशाकटविल्लतयम
यमस्थापकमुद्रा प्राणापानव्यानोदानसमानचित्त अहंकारजनितपापोपशमनं फले याज्ञवल्क्य:
कतिसंध्या केवर्णा: कानिस्वरूपाणि ब्रह्म उ० पूर्वसंध्यागायत्रीभवति मध्यमासंध्यासावित्रीभव
ति पश्चिमासंध्यासरस्वतीभवति उत्तरासंध्यातुरीयाभवति रक्तवर्णागायत्री श्वेतवर्णासावित्री कृष्ण
वर्णासरस्वती पीतवर्णातुरी प्रात:संध्यागायत्री बालाकुमारी रक्तांगी रक्तवर्णा रक्तपद्मासनस्था रक्तां
बरधरा रक्तगंधानुलेपना रक्तपुष्पमालाधरा चतुर्मुखी चतुर्भुजा द्विनेत्रा अक्षमालाकमंडलुस्रुक्स्रुव

७९ धारिणी सर्वाभरणभूषिता हंसवाहना ऋग्वेदमुद्गिरंती आहवनीयमध्यस्था ब्रह्मदेवत्या चतुष्पदा अष्ट
कुक्षिः सप्तशीर्षा अग्निमुखा रुद्रशिखा विष्णुहृदया ब्रह्मकवचा सांख्यायनगोत्रा आदित्यमण्डलम॰
79 ध्यगामिनी कालत्रये विनियोगः इत्येषा वै प्रातःसंध्या गायत्री इति सगुणमूर्तिं ध्यात्वा अथ निर्गुणं
हृदि विकसितपद्मे सार्कसोमाग्निबिंबं प्रणवमयमचिंत्यं यस्य पीठं प्रकल्प्य अचलपरमसूक्ष्मं ज्योतिराका
शसारं स भवति मनसो मे वा स देवप्रतिष्ठा मध्याह्नसंध्या सावित्री श्वेतांगी श्वेतवर्णा श्वेतपद्मासनस्था
श्वेताम्बरधरा श्वेतगंधानुलेपना श्वेतमाल्यधरा पंचमुखी त्रिनेत्रा दशभुजा त्रिशूलडमरूपाशअसि॰
शंखचक्रगदाकपालवराभयधारिणी सर्वाभरणभूषिता युवती वृषभवाहना यजुर्वेदमुद्गिरंती रुद्रदेव

त्या गार्हपत्यमध्यस्था चतुष्पदा अष्टकुक्षिः पंचशीर्षा अग्निमुखा रुद्रशिखा विष्णुहृदया ब्रह्मकवचा ।
सांख्यायनगोत्रा कमलासने विनियोगः इत्येषा वै मध्याह्नसंध्या सावित्री इति सगुणध्यानं अथ निर्गुण
ध्यानं हृदयकमलमध्ये दीपवद्देहसारं प्रणवमयमनर्कं योगिभिर्ध्यानगम्यं हरिगुरुशिवयोगं सर्वभूत
स्थमेकं सकृदपि मनसा वै ध्यायते यः स मुक्तः । सायंसंध्या सरस्वती वृद्धा कृष्णवर्णा कृष्णपद्मासनस्था कृ
ष्णांबरधरा कृष्णगंधानुलेपना कृष्णमाल्यधरा एकमुखी चतुर्भुजा द्विनेत्रा शंखचक्रगदापद्मधारिणी
सर्वाभरणभूषिता गरुडवाहना सामवेदमुद्गिरंती दक्षिणाग्निमध्यस्था विष्णुदैवत्या चतुष्पदा अष्टकुक्षिः
सप्तशीर्षा अग्निमुखा रुद्रशिखा विष्णुहृदया ब्रह्मकवचा सांख्यायनगोत्रा सम्यक्विताने विनि॰ इत्येषा ।

१० वैश्नवंसंध्यासरस्वती इतिसगुणध्यानं ॥ अथनिर्गुणध्यानं विष्णुंभास्वत्क्षरीरांगदवलयकलाकल्पहारोद
रांघ्रि श्रोणीभूषंसवक्षोमणिमकरमहाकुंडलामंडितांगं हस्ताग्रचक्रशंखांबुजगदममलंपीतकौशेयवासं
80 उद्यद्भासंसमुद्यद्दिनकरसदृशंपद्मसंस्थंनमामि उक्तासंध्यातुरीया पीतवर्णा पीतपद्मासनस्था पीतांब
रधरा पीतगंधानुलेपना पीतमाल्यधरा षण्मुखी षड्भुजा सहस्रनेत्रा कुशमुष्टिमुद्गरवज्रकमलधावरद
भयधारिणी सर्वाभरणभूषिता ऐंह्रींमुख्या ऐरावतवाहना अथर्ववेदमुद्गिरंती संवर्तोग्निमध्यस्था इंदुदे
वत्या चतुष्पदा अथप्रकृतिः सप्तशीर्षा अग्निमुखा रुद्रशिखा विष्णुहृदया ब्रह्मकवचा सांख्यायनगोत्रा पू
र्णतानेविनियोगः इत्येषावैसंध्यातुरीया यातव्याख्यावाच मंत्रोवापदिवाविप्रसंकरोजापतेकश्चित सर्वे

थामेवपापानांशोधनंब्रूहिमेप्रभो ब्रह्मोवाच प्रणवेनियमप्रोक्तस्याछिरोव्याहृतिसप्तकः दशप्रणवयुक्ते॰
नःप्रयुक्तंशोधनंउत्तमो याज्ञवल्क्योवाच द्वात्रिंशद्व्याहृतीनांगायत्र्याश्चकेऋषयः कानिछंदांसिकानिदैवतानि ब्र॰
ह्मोवाच वामदेवोऽग्निर्वशिष्ठः शुक्रः कण्वः पराशरः विश्वामित्रोमहातेजोकपिलः शौनकोमहान् याज्ञ॰
वल्क्योभरद्वाजोजमदग्निस्तपोनिधिः गौतमोमुद्गलश्चैववेदव्यासश्चलोमशः ऽगस्तिः कौशिकोवत्सो॰
पुलस्त्योमांडुकस्तथा दूर्वासास्तपसांश्रेष्ठोनारदः कश्यपस्तथा विमलश्चंगउशनाऽङ्गिराश्चऋषिस्मनः
कुत्सोहारितकश्चैवमार्कंडेयस्तथैवच इत्येतेऋषयः गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तिरेवच त्रिष्टुब्जगती
चैवऽत्रतीजगतिकास्तथा सत्याप्रस्तारपंक्तिश्चप्र -------- ऽप्रत्तरपंक्तिः कात्यायनीज्योतिष्म

८१ तीलथैवच त्रिष्टुब्जगतीछन्दो सर्वछंदो महानिधिः भूर्भुवस्वरितिछन्दोदेवीगायत्रीछन्दकं अतुलमव्यक्तं प्रकृति
विकृतिसंस्कृतिरेवच अभिसौम्याकृतिश्चैव समानीतितत्पदं इत्येतानि छंदांसि प्रथममाग्नेयं द्वितीयंप्राजा
81 पत्यं तृतीयंसौम्यं चतुर्थमीशानं पंचममाग्नेयं आदित्यंषष्ठं बार्हस्पत्यंसप्तमं मैत्रावरुणमष्टमं भगदैवत्यंन
वमं अर्यमणं दशमं सावित्रमेकादशं त्वाष्ट्रंद्वादशं पौष्णंत्रयोदशं ऐन्द्राग्नं चतुर्दशं वायव्यंपंचदशं वामदे
व्यंवैधं षोडशं द्यावापृथिवीयंसप्तदशं आन्तव्यमष्टादशं वैश्वदेवमेकोनविंशं वैष्णवंविंशं वासवमेकविं
शं रौद्रंद्वाविंशं कुबेरंत्रयोविंशं आश्विनंचतुर्विंशं ब्राह्मंपंचविंशं मासंषड्विंशं विद्याधरंसप्तविंशं गगनं
अष्टाविंशं गांधर्वमेकोनत्रिंशं किन्नरंत्रिंशं किंपुरुषमेकत्रिंशं ब्रह्माद्वात्रिंशं याज्ञवल्क्यउवाच कृशाङ्क

यः कतिवर्णाः कतितत्वानि कतिमुद्रा यौतेवंल्कप उवाच कं ब्रह्मोवाच वामदेवीप्रभासत्या विश्वमुद्रा ८
विलासिनी प्रभावती जया शान्ता कान्ता दुर्गा सरस्वती विद्रुमा च विशालेशा व्यापिनी विमला तथा न
मोपहारिणी सूक्ष्मा विश्वयोनिर्जया प्रिया वा पद्मालया परा शोभा भद्रा च त्रिपदा स्मृता ब्राह्मी माहेश्वरी
चैव कौमारी वैष्णवी तथा वाराही नारसिंही च इंद्राणी चण्डिका तथा इत्येषमात्रकाश्चैव नुर्यरूपाश्च शक्त
यः चंपकाग्रतसीपुष्पसन्निभं विद्रुमं तथा स्फटिकाकारकं चैव पद्मपुष्पसमप्रभं तरुणादित्यसंकाशं शं
खकुंदेंदुसंनिभं प्रवालपद्मपत्राभं पद्मरागसमप्रभं इंद्रनीलमणिप्रख्यं मौक्तिकं कुंकुमप्रभं ग्रंजनाभं च रा
जं च वैदूर्यं तौद्रसन्निभं हरिद्रुकस्तुर्याभं रविकांतिसमप्रभं शूकपुच्छनिभां रश्मशानपत्रं च बिल्वकं केतकी

२२ बकुलपुन्नागजातिकामल्लिकातथा करवीरश्चइत्येतेक्रमेणपरिकीर्त्यते [?]व्यापत्तयानेजोगापुराकाणामे ।
वच गंधोरसश्चरूपंचशब्दस्पर्शस्तथैवच उपस्थपायुपादश्चपाणिर्वागपिचक्रमात् घ्राणंजिह्वाचचक्षुश्च ।
82 त्वकश्रोत्रंचततःपरं प्राणापानस्तथाव्यानसमानोदानमेवच नागकूर्मवासकिश्चधनंजयःकृकलःस्य ।
न कंयाव्यक्तंत्वंचज्ञानयंचयथाक्रमं सुमुखंसंपुटंचैवविततंविस्तृतंतथा द्विमुखंत्रिमुखंचैवचतुःपंचमुखंत
था षण्मुखंचाधोमुखंचैवव्यापकांजलिकांतथा शकटंयमपाशंचग्रथितंचोन्मुखोन्मुखं प्रलंबमुष्टिकंचै
वमत्स्यकूर्मवराहकं सिंहाक्रांतंमहाक्रांतंमुद्गरंपल्लवंतथा त्रिशूलयोनिसुरभिश्चाक्षमालाचलिंगकं अंबुजं
चमहामुद्रानूर्ध्वरूपाप्रकीर्तिताः याज्ञवल्क्यउवाच ओंपोज्योतिरसोमृतंब्रह्म कोऋषिः कादेवता कश्छंदः को ।

वर्णः किं तत्त्वं किं तिथा ऋषयः कानि बीजानि कति मुद्रा ब्रह्मोवाच प्रजापतिर्ऋषिः परमात्मा देवता गायत्री ।
छन्दः दीप्तो वर्णः तेजस्तत्त्वं ब्रह्मी स्वांगी च वागी च तत्पाविद्याविलासिनी प्रभावती च लोला च शोणिता आहुतिः ।
ऋषयः वं शं षं सं हं लं क्षं इति बीजानि पद्मव्याख्यानकं चैव स्तरभिर्योनिमेव च मत्स्यवाराहकं लिंगं शिरो व्या ।
हृतिमुद्रिका यातव· षद्तुनं छंद ऋष्यादि देव्याः किं च ये प्रभो कथं न्यासेश्च ब्रह्मांडं पिंडे हृदयं तिथोगिभिः ब्र ।
ह्मोवाच विश्वामित्रो ऋषिश्चैव देव्यानुष्टुप्चैव छन्दकं पिंडमयं तत ब्रह्मांडं न्यासरूपं च हृदये ते ·अर्पणन्यासः सविता ।
देवता चास्यमुखमग्निरुदाहृतं ब्रह्मा मूर्ध्नि शिखा विष्णुरात्मा हृदि प्रतिष्ठितं उरस्तः पृथिवी कुक्षौ त्रैलोक्यचर ।
णविति याज्ञवल्क्य· सर्वस्या ब्रह्मरूपेण श्रोतुमिच्छामि तत्त्वतो द्वात्रिंशद्वर्णानां च ·सर्वन्यासं वद प्रभो ।

८३ ब्रह्मोवाच ऋषिछंदापि दैवं च वर्णाश्च स्वरयोः क्रमात् बीजानि शक्तिमित्यादि नवमुद्राः प्रकीर्तिताः ध्यानम् ।
निमयं ध्यात्वा मंत्रार्थंगतमानसः सिद्धासने च वज्रे च अवस्थाद्वादश क्रमात् अन्यथा निष्फलं चैव इति वे ।
देन भाषितं अथ अर्थन्यासः द्यौःमूर्ध्नि ऋषिब्रह्मांडे ब्रह्मा मूर्ध्नि शिखायां विष्णुः रुद्रो ललाटे ऋग्वेदो मध्ये ।
परमात्मा चक्षुषी चंद्रादित्यौ कर्णयोः शुक्र बृहस्पतिर्नासिकयोः वायुर्दैवतं दंतपंक्तौ अश्विनावुभे संधियो ।
ष्ठे मुखमग्निः जिह्वायां सरस्वती ग्रीवायां तु बृहस्पति स्तनयोर्वसवो वक्षो बाह्वोर्मरुतः हृदये पर्जन्यः आकाशं उ
दरे नाभौ अन्तरिक्षं कट्योरिंद्राग्निः जघने विज्ञानं घन प्रजापतिः कैलासमलयऊरू विश्वेदेवा जान्वोः जंघायां
कौशिकः गुह्यमपाने गुरौ पितरः पादे पृथ्वी वनस्पतयोंगुलीषु ऋषयो रोमाणि नखान्मुहूर्तानि अस्थिषु ग्रहाः

॰अस्य आत्मसंज्ञतः संवत्सरो वै निमिषं ॰अहोरात्रं चादित्यश्चन्द्रमा देवता एवं वरदां वीद्यां गायत्रीं सहस्रेण
त्रां धारणामहं प्रपद्ये ॐ तत्सवितुर्वरदाय नमः तत्पूर्वजाय नमः तस्मा आदित्याय नमः तस्मा आदित्य प्रतिष्ठायै
नमः प्रातरधीयानो रात्रिकृतं पापं नाशयति सायमधीयानो दिवसकृतं पापं नाशयति सायंप्रातरधीयानो
॰अपापो भवति सर्वेषु तीर्थेषु स्नातो भवति सर्वैर्देवैर्ज्ञातो भवति ॰अवाच्यवचनात्पूतो भवति ॰अभाष्यभाष
णात्पूतो भवति ॰अभक्षभक्षणात्पूतो भवति ॰अभोज्यभोजनात्पूतो भवति ॰अचोष्यचोषणात्पूतो भवति ॰असाध्य
साधनात्पूतो भवति ॰अलेह्यलेहनात्पूतो॰ ॰अपेयपानात्पूतो॰ ॰अगम्यागमनात्पूतो॰ वृषलीगमनात्पूतो॰ दुःप्रति
ग्रहात्पूतो॰ सर्वप्रतिग्रहात्पू॰ पंक्तिदूषणात्पू॰ ॰अनृतवचनात्पूतो॰ ॰अब्रह्मचारी ब्रह्मचारी भवति ॰अनेकहृदये

नाधीतेनक्रतुसहस्रेनेष्टंभवति षष्टिशतसहस्रगायत्र्याजपफलानिभवंति अष्टौब्राह्मणान्सम्यग्ग्राहये
तस्यसिद्धिर्भवति यइदंनित्यमधीयानोब्राह्मणःप्रयतःशुचिःसर्वैःपापैःप्रमुच्यते इति ब्रह्मलोकेमहीय
ते इत्याहभगवान्याज्ञवल्क्यः इतिगायत्रीहृदयंसमाप्तं याज्ञवल्क्यउवाच स्वामिन्सर्वजगन्नाथसंशयो
स्तिममप्रभो चतुःषष्टिकलाभिज्ञपातकाद्योगविद्वरः मुच्यतेकेनपुण्येनब्रह्मरूपंकथंभवेत् देहश्चदेव
तारूपंमंत्ररूपंविशेषतः कर्मतःश्रोतुमिच्छामिन्यासंचविधिपूर्वकं ऋषिश्छंदोधिदैवंचध्यानंचविधिपू
र्वकं ब्रह्मोवाच अस्यश्रीगायत्रीकवचस्तोत्रमंत्रस्य ब्रह्मविष्णुमहेश्वराऋषयः ऋग्यजुःसामाथर्वाणिछंदां
सि परब्रह्मस्वरूपिणीगायत्रीदेवता तत्बीजं भर्गःशक्तिःधियःकीलकं मोक्षार्थेविनियोगः ओंतत्सवितु

ब्रह्मात्मने हृदयाय । ॐ वरेण्यं विष्णवात्मने शिरसे । ॐ भर्गो देवस्य रुद्रात्मने शिखा । ॐ धीमहि ईश्वरात्म
ने कवचाय हुं, ॐ धियो यो नः सदाशिवात्मने नेत्रत्रयाय वौ । ॐ प्रचोदयात् परब्रह्मात्मने । अस्त्राय । ॐ भू
र्भुवस्स्वरोमिति दिग्बन्धः ॥ अथ ध्यानं ॥ मुक्ताविद्रुमहेम । गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे ब्रह्मसंध्या
तु मे पश्चादुत्तरायां सरस्वती पावकीं च दिशं रक्षेत् पावमानीविलासिनी पातु यनादिशं रक्षेद्यातुधानभयंकरी
पावमानी दिशं रक्षेत् पवमानविलासिनी दिशं रौद्रीं च मे पातु रुद्राणी रुद्ररूपिणी ऊर्ध्वं ब्रह्माणी मे रक्षेदध
स्ताद्वैष्णवी तथा । एवं दश दिशो रक्षेत् सर्वांगं भुवनेश्वरी तत्पदं पातु मे पादौ जंघे मे सवितुः पदं वरेण्यं कटिदेशे
तु नाभिं भर्गस्तथैव च देवस्य मे तु हृदयं धीमहीति च गल्लयोः धियः पदं च मे नेत्रे यः पदं मे ललाटके नः पदं पातु

८५ मे मूर्ध्नि शिखायां मम प्रचोदयात् तत्पदं पातु मूर्द्धानं सकारः पातु भालकं चक्षुषी तु विकारार्णं तुकारस्तु कपोलयोः
नासापुटे वकारं च रेकारस्तु मुखे तथा णिकार ऊर्ध्वमोष्ठं तु यकारस्त्वधरोष्ठकं आस्यमध्ये भकारं गोकारं चुबुके
85 तथा देकारः कण्ठदेशे तु वकारः स्कन्धदेशके स्यकारो दक्षिणे हस्ते धिकारो वामहस्तके मकारो हृदयं रक्षेद्धिकारो उदरं
तथा धिकारो नाभिदेशे तु योकारस्तु कटिं तथा गुह्यं रक्षतु योकार ऊरू द्वौ नः पदाक्षरं प्रकारो जानुनी रक्षेत् चोकारं
जङ्घदेशकं दकारो गुल्फदेशे तु याकारः पादयुग्मकं तत्कारव्यञ्जनं चैव देवताभ्यो नमो नमः इदं तु कवचं दिव्यं बा
धाशत्रुविनाशनं चतुःषष्टिकलाविद्यादं गाद्यखिलपातकैः मुच्यते सर्वपापेभ्यो परं ब्रह्माधिगच्छति इति गा
यत्रीकवचस्तोत्रं संपूर्णम् अथ प्राणायामत्रयं कुर्यात् गंधपुष्पाक्षतान् हस्ते गृहीत्वा मुद्रां परिदेवता संपूज्य मुद्रः

दक्षिणभागे गणेशं संपूज्य मध्यपार्श्वभागे चतुष्पदादिदिग्बंधनमंत्रोद्धारं संपूज्य मध्यस्थभागे प्रस्तुयंत्रं संपू
ज्य मध्ये मूले शापविमोचनमंत्रं संपूज्य निशेषकुंभकं कुर्यात् षोडशोपचारैर्मानसं कुर्यात् ॐ मित्येकाक्षरं ब्रह्म
इत्यादि शापविमोचनं पठेत् अर्गलं पठेत् अथ शतनामाष्टकवारं पठेत् अथ पंचप्रणवगायत्रीजपं कुर्यात् ॐ
भूर्भुवः स्वः० अथ उत्तरांगध्यानमुद्रादिकं कुर्यात् आगच्छ वरदे देवी गायत्री ब्रह्मरूपिणी जपानुष्ठानसिद्ध्यर्थं
प्रविश्य हृदयं मम इति गायत्रीपुरश्चरणे नित्यविधानं समाप्तं अथ होमविधिः भूशुध्यर्थं प्रतिशय संस्कार (
वास्तुहोमं कुर्यात् पुरश्चरणे द्वाराभ्यस्तमाप्तदिनपर्यंतं व्रतदोषनिरसनार्थं पंचगव्यहोमं कुर्यात् गंधवर्णेर समि
भिः स्ववर्णां भूमिं नात्वा तच्छोधनार्थं कारयेत् सच प्रकारः ॐ तन्पुरुषायेति भूमिं शोधयेत् अथ वेदिसंस्कारं करोति

८६ वामदेवेतिसंचरेत् सद्योजातमित्यवगुंठनं कुर्यात् ॥ प्रतिष्ठायः पंचगव्यनुवास्तुहोमसत्येवच ॥ अग्निमुखं ततः कुर्यात्पश्चा
द्धोमं हुनेदप्य ततः तदादौ ॥ प्रतिष्ठायसंस्कारमहं करिष्ये तथ्यादिसंकीर्त्यस्वणाखोक्तं ॥ अग्निमुखं कुर्यात् तदंगमन्वाधा
नं करिष्ये इतिसंकल्प्य ॥ अत्रप्रधानं चतुर्भिर्व्याहृतिभिः प्रधानदेवता ॥ आज्यद्रव्येण शेषेण स्विष्टकृतं ॥ इति ॥ प्रतिष्ठाय
संस्कारः ॥ अथ पंचगव्यविधिः तिथ्यादिपूर्ववत् ॥ अग्निमुखं कुर्यात् गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं सचमं
त्रः गायत्र्या गोमूत्रं गंधद्वारामिति गोमयं ॥ आप्यायस्वेति क्षीरं दधिक्राव्णोति दधि घृतं मिमिक्षेति घृतं देवस्यत्वे॰
ति कुशोदकं तदंगमन्वाधानं करिष्ये तत्रदेवता॰ ॥ अत्रप्रधानं इरावती इदं विष्णुर्मानस्तोके ब्रह्मजज्ञानं गायत्र्याः ए॰
ताः प्रधानदेवताः पंचगव्यद्रव्येण शेषेण स्विष्टकृतं ॥ होमांते प्राशनं कुर्यात् गायत्रीमंत्रेण पश्चात्स्विष्टकृतं इति पं

86

चेगव्यहोमः ॥ अथ वास्तुहोमप्रकारः पूर्ववदग्निमुखं कुर्यात् ॥ अत्र प्रधान चतुर्भिर्मंत्रैः प्रधानदेवता चरुद्रव्येण ।
स्विष्टकृतमग्निं हविःशेषेणोत्यादि बलिदानं कुर्वे येन कृतं इति वास्तुहोमः विधिवद्विहिते कुंडे स्थण्डिले चतुर
स्रके सच प्रकारः प्रथमं तावत्समानभूमि पूर्वाह्णे द्वादशांगुल शंकुप्रमाणस्यार्द्धेन किंचिदधिकेन सूत्रेण वृत्तं का
र्यं तस्मिन् वृत्ते शंकुछायाग्रं यत्र विशति यत्र चापैति तत्र भूमौ चिह्नद्वयं कार्यं ॥ अपराह्णेपि तथैव पुनश्चिह्नद्वयं
कार्यं पूर्वदिनकृतचिह्नापराह्णकृतचिह्नयोरंतराले भागः कल्प्याः यदा छायाग्रं विशति यदा च अपैति तदंतराले या
घटिकाः छायाह्निनातान्याः तासु घटिकाभिरेतेषां ततः अंतरालभागा गुण्याः षष्ट्या भाज्याः ॥ आगता यभागस्ते पूर्वदि ।
न कृतं प्राचीसूत्रं पूर्वभागे एवं सूर्यस्य उत्तरस्मिन्नयने उत्तरतो दक्षिणे तस्मिन् दक्षिणेन श्चालने लास्फुटतरा प्राची

८७ भवेत् ततो देवप्राचीसूत्रं तदर्द्धं यमारभ्य तन्मध्ये किंचिद्दुल्लिख्य स्थितेन व्यासार्द्धेन मध्यादिमुखं मिलद्धनार्द्धद्वयं कुर्यात् त॰
त्रयोर्दक्षिणोत्तरगतौ मत्स्यौ तन्मध्यां केदक्षिणोत्तरं सूत्रं पातयेत् कुंडमंडपादेर्यो सो यावान् निष्पन्नावच्छिन्नगुणो रज्जुं॰
उभयतः पाशं कृत्वा तामेव तत्पार्श्वयोः पाशौ व्यासार्द्धमाने चिह्नयेत् शंकुर्ष्येत् ततः शंकुकाद्वयनीयन व्यासार्द्धेन तस्य॰
पार्श्वमाने चिह्नयेत् कर्णं पचनतः कुंडमंडपादेः प्राचीसूत्रप्रमाणेन दत्त्वान्तं दत्तयोः शाका निरवन्यत्रयोर्त्त रज्जु
पाशौ तथा कुर्यात् यथा व्यासार्द्धार्घं कोयतः कृतः स पाशः प्रतीच्यां स्यात् कर्षेच्चिह्नं दक्षिणतः ग्रकृष्य
व्यासार्द्धचिह्ने दक्षिणश्रोणिशंकुं दद्यात् व्यत्यस्यैवं उत्तरतानुदक्श्रोणिशंकुं दद्यात् पाशौ व्यत्यस्यैवमंस्यौ
स्याप्यौ इति ततश्चतोमंडपः समस्थितो वा प्रपदेच्छिन्नो वायः ऊर्ध्वबाहोनरपंचमांशः समलस्यचतुर्विंशांगु

लमिति दशहस्तद्वादशहस्तौमंडपावधमौ द्वादशहस्तो चतुर्दशहस्तौमध्यमौ षोडशहस्तोष्टदशहस्तावु
त्तमौ तन्मंडपमध्ये तृतीयांशेन कुंडकार्यं दशानांतु हस्तमिति विस्तरतो शीर्षोच्चकं वेदिद्वयं कार्यं गायत्री
पीठनवग्रहार्थं एकहस्तं कुंडं व्याससमानं चतुर्विंशतिरंगुलं द्विहस्तकुंडं व्यासस्यमानं चतुस्त्रिंशदंगु
लानि ३४ एकचत्वारिंशदंगुलानि ४१ पंचयव ५ त्रिहस्ते अष्टचत्वारिंश ४८ दंगुलानि चतुर्हस्त
स्य त्रिपंचाशदंगु ५३ लानि षट्यवाः ६ पंचहस्तस्य अष्टपंच ५८ दंगुलानि सप्तयवाः ७ षट्हस्त
स्य त्रिषष्टि ६३ रंगुलानि चत्वारोयवाः ४ सप्तहस्तस्य सप्तषष्टिरंगुलानि ६७ अष्टहस्तस्य द्विसप्ततिरं
गुलानि ७२ नवहस्तस्य पंचसप्तति ७५ रंगुलानि सप्तयवाः ७ दशहस्तस्य पंचाशन्मात्रहोमेमुष्टिमात्रं कुं

८८ डे शतहोमे ॰अरत्निः सहस्रे हस्तमिति ॰अयुते द्विहस्तं लक्षे चतुर्हस्तं दशलक्षे षड्ढस्तं कोटिवषड्ढस्तं कोटौ दशह
स्तं कार्यं एकविंशत्यंगुलो मुष्टिरत्निश्च २१ द्वाविंशतिः २२ यवाः ४ ॰अंगुलो रत्निः कुंडखाते ॰प्रथममेखलायाः सह
व्यासतुल्यं कुंडे व्यासचतुर्विंशांशेन कंठः स च द्विहस्तकुंडे किंचिन्न्यूनसार्द्धांगुलः ॰अंगुल १ यव २ यूका २ तस्माद्
द्विरायामेखलाया कार्या चतुरस्रं हि तेन व्यासस्य चतुर्विंशतिभागान्कृत्वा कंठाद्बहिः समंततश्चतुर्विंशतिभागाः
विस्तारः नवमांशकोच्चा प्रथममेखला चतुष्कोणा कार्या तद्बहिर्द्वितीया ॰अंशत्रयविस्तारा षडंशोच्चा तद्बहिस्तृ
तीया ॰अंशद्वयविस्तारा ॰अंशत्रयोच्चा द्विहस्तकुंडे तु प्रथममेखला सार्द्धपंचांगुलविस्तारा ५ यव४ द्वाद
शांगुलानि षडयवोच्चा ॰अंगुल १२ एवं द्वितीया तु चत्वार्यंगुलानि यव द्वयविस्तारा ॰अंगुलानि ४ यव २॥
६॥

राम

अष्टांगुलानि चतुर्थयोन्या अंगुले २ यव ४॥ तृतीयमेखला यवोनांगुलत्रयविस्तारा अंगुलें २ यव ७॥ चत्वार्यंगु-
लानि ४ यवद्वयोन्या अंगुलें ४ यव २॥ अथ योनिः कुंडव्यासार्द्धमानेन दीर्घा कुंडव्यासतृतीयांशेन विस्तृता कुं-
डव्यासचतुर्विंशांशेनोन्नता अग्रभागे गजोष्ठवत् पश्चभागे तु व्यासतृतीयांशार्द्धार्द्धमानेन कर्कटकेन भ्रमणे वृत्तार्द्ध-
द्वयमिति द्विहस्तकुंडयोनिस्तु सप्तदशांगुलदीर्घा एकादशांगुलात्किंचिन्न्यूनयवत्रयविस्तृता एकांगुलात्किंचिद-
धिकयवत्रयोन्नता पूर्वभागे गजोष्ठवत्कर्त्तव्या पश्चे चतुरंगुलयवद्वयमितेन कर्कटकेन सूत्रेण वा कृतवृत्तार्द्धद्वयसं-
लग्ना कार्या कुंडोपरि अंगुलमवेशवतीनिवेश्या अधः स्वचिरं कार्यं कुंडमध्ये नाभिर्निवेश्या सा च पद्माकारा तत्र
कुंडाकारा वा कर्त्तव्या तस्य उच्चत्वं कुंडव्यासद्वादशांशेन विस्तारायामौ तु व्यासषडंशेन द्विहस्तकुंडे नाभिस्तु अंगु

१८९ लक्ष्यात्किंचिदधिकं षड्यवैर्वा ऽंगुल २ यव ६ धूका विस्तारायामौ तु ऽंगुलपंचकं किंचिदधिकमितौ पंचयवं कर्त्त
व्यौ ऽथ मंडपः दिक्षां मध्ये द्विहस्तविस्तृतानि चत्वारि द्वाराणि दिक्सूत्रामितो हस्तमाने कृते द्वारशाखानि कार्या
णि इत्यधममंडपद्वये ऽथ द्विविधेपि मध्यममंडपे चतुरंगुलाधिकद्विकारायामानि उत्तममंडपद्वयेपि ऽंगु
लाधिकद्विकारायामानि सारद्रुमाः शालशिंशिपामधूकजंबादीनां क्ष जवः समा प्रमाणाः षोडशस्तंभास्तेषु
स्तंभेषु कोणस्था द्वारस्थाश्च द्वादशस्तंभाः पंचहस्तमिताः कार्या वेदिकोणगाश्चत्वारः सचूडाः शिरोभाजो
ऽष्टहस्ता नवहस्ता वा भवंति सर्वेपि स्तंभाः स्वस्वपंचमांशेन निखेयाः तत्र वेदिकोणस्तंभेषु उपरि चूडाप्रांतसंधा
णे उभयतोरंध्रद्वयवती चत्वारि तिर्यक्काष्ठानि वलिकाख्यानि निधेयानि चत्वारि स्तंभो मंडपकोणेषु खेयाः अग्रे

89

राम

ष्टोऽप्येकैकं द्वारमुपरि उभयतोऽष्टौ एवं वेदिकोणगस्तंभपङ्क्तिः समन्तयानि वेद्याः एषु वास्यस्तंभेषु चूडानि ।
यमोनास्ति तिर्यक्काष्ठनिवेशनं तु स्तंभकरणे द्विनं कार्यं वेदिकोणोस्थस्तंभेषु चूडानि यमरूपव मंडपस्त ।
परितश्च कटैराच्छाद्यः अथ तोरणान्याह अश्वत्थशाखे पूर्वद्वारे उदुम्बरशाखे दक्षिणद्वारे प्लक्षशाखे
पश्चात् वटशाखे उत्तरे शाखाश्चाधममध्यमोत्तममंडपेषु क्रमात् पंचषट्सप्तहस्ता भवंति तासामु
परिकल्पितं चूडास्तु तिर्यक्फलकं उभयतः सबिलं चूडोन्यस्तबिलं न्यसेत् तिर्यक्फलकं छिद्रस्तंभमध्ये
मंडपे अंगुलषड्भाधिकमध्यमे द्वादशांगुलाधिक उत्तमे तिर्यक्फलकोपरि मध्यमे मंडपक्रमाच्चतुरंगु ।
लाः सार्द्धचतुरंगुलाः पंचांगुलानि कीलानि वेध्याः तिर्यक्फलकं कीलाश्च तन्नकाष्ठस्यैव तोरणस्वरूपं

८० नेकीलाः वैष्णवयागे पूर्वादिक्रमेण शंखचक्रगदापद्माभाख्याः कार्याः शैवयागेतु कीलाः शूलाकाराः स्युः
तत्रशूलाकारास्त्वेव नवांगुलोच्चोत्तममध्यमकीलाः सरलाः तमुभयतोन्योन्यं किंचिद्वक्रौ लंपाद्यषडंगुल।

विस्तारः शूलस्यफलकमध्ये स्थितेन विलेख्यंगुलप्रवेशः इत्यधममंडपे मध्यमेनतु एकादशांगुलोच्चः पा
दोनत्र्यंगुलोविस्तारः त्र्यंगुलोविलप्रवेशः उत्तममंडपेनतु द्वयोर्दशांगुलउच्छ्रायः सपादत्र्यंगुलोविस्ता
रः चतुरंगुलोविलप्रवेशः तोरणानि निजपंचमांशेन गर्तेषु प्रवेशनीयाः इतिसर्वत्रोपकुण्डमण्डपवि
धाने ॥ अथ नित्यप्रकारः नित्यंत्रिषवणं स्नानंहुतंकर्मविवर्जितं नैमित्यकार्चनं चैवविष्वासोगुरुदे।
वयोः ॐ ह्रींषकंचुकीनन्नामुक्तकेशालपाविवा ॥ अथपवित्रकारः शुक्लः प्रलपत्नजपैर्वाचितं ॥ अथ पवित्रक
प

राम

गतनग्नशिरसाप्रावृतोपिवा प्रलपन्नजपेद्यावन्नावन्नैष्कस्यमुच्यते पतितानांमंत्यजानांदर्शनेभाष

णेष्कृते क्षुतेनेष्ठीवाधःगमनेजृंभणेजपमुत्सृजेत् प्राप्तेणान्वांङिःयम्यंच प्राणायामषडंगकं कृत्वा

सम्यक्जपेच्छेषंयद्वासूर्यादिदर्शनं सत्यवादिपवित्राणिजपेद्व्याहृतयस्तथा ॐकाराद्यास्तुनांजप्या

सावित्रीचतदिच्छया ॥ अथजपमालाप्रकारः ॥ अकारादीनांवर्णानां क्षकारादीनांतिमवर्णान्सानुस्वारंकृ

त्वापूर्वमुच्चार्यमंत्रजपःकार्यः ॥ अनेनप्रकारेण अष्टोत्तरसंख्याजपोभवति ॥ अंतर्यजनमित्यपल

क्षणं सबिंदुवर्णमुच्चार्यपश्चान्मंत्रंजपेद्बुधः ॥ अकारादिक्षकारांतंबिंदुयुक्तंविभाव्यच वर्णमालाम

माख्याता अनुलोमविलोमका ॥ आसहस्राद्वाशतादाद्दशाद्वादशावाजपेत् ॐकारव्याहृतिःसितसा

८१ द्वितीयमथवाकृतं ॰अग्निर्वैपल्लवाव्ययंशाखाध्यायपारगा स्नानसंध्याजपध्यानंहोमतर्पणतत्परः।
निष्कामोदेवतायांचसर्वकर्मनिवेदकः॰ एवंनदीतीरेनित्यंसंपाद्यततोगृहंगत्वा प्रक्षाल्यपादौयाग।
गृहंप्रविश्यासनेकुण्डदक्षिणभागेब्राह्मणान्संपूज्यस्वगुरोर्विघ्नविषयादिनातोषयेत् ततःकुलदेवतांन।
मः सर्वेभ्योब्राह्मणेभ्योनमः ॰प्रासनादिदिग्बंधनंकुर्यात् ॐमित्येकाक्षरंब्रह्मइत्यादिषडंगंकुर्यात्।
ध्यानावाहनादिदेवतान्संपूज्य ॰अथहोमप्रकारः ॰आहवनीयगृह्यंवालौकिकंवाग्निमुज्वलेन् ॰अग्नि
मानीयकुण्डसमीपे॰आग्नेयदिशोस्थिरीकृत्यस्वस्वशाखोक्तमग्निमुखंकुर्यात् ॰आचम्यप्राणानायम्यदे
शकालौस्मृत्वागायत्रीपुरश्चरणद्वात्रिंशल्लक्षकृतंनदृशांशेनहवनांगत्वेनस्थंडिलउपलेपनउल्लेख।

नाग्निप्रतिष्ठापनं करिष्ये उल्लिख्योदगायामां तस्या उभयतो परे पूर्वायते उदक्संस्थे ऽसंसृष्टे ।
च पूर्वया मध्ये तिस्र उदक्संस्थाः पूर्वायामा ऽसंहृता लिखित्वा येन शकलेन यत्तिर्यं तं निधाय च ऽप
द्भिरभ्युक्ष्य शकलेन निरस्याप उपस्पृश्य प्रतिष्ठाप्या पारेलास्कहोमाया पालेहविर्भुजे एह्यग्न इति मंत्रस्य
राहुगणो गोतम ऋषिः ऽग्निर्देवता त्रिष्टुप्छन्दः ऽग्न्यावाहने वि० ॐ एह्यग्न इह० ऽग्निमावाह्य
ऽग्निनाग्निरिति मंत्रस्य मेधातिथि ऋषिः ऽग्निर्देवता गायत्री छन्दः ऽग्नि सन्मुखीकरणे वि०
ॐ ऽग्निनाग्निः समिध्य० ऊ षोदमूनेत्यस्य हिरण्यगर्भो ऽग्निस्त्रिष्टुप् ऽग्निसमृद्धिकरणे वि० ॐ ऊ
षोदमूना ऽपति० ॐ भूर्भुवः स्वरों ऽग्निं प्रतिष्ठाप्य यत्र वेत्थ वनस्पत इति मंत्रस्य वसुश्रुत ऋषिः ऽग्नि

दैवतागायत्रीछन्दः इध्मप्रक्षेपणे वि॰ ॐ यत्र वेभ्यवनस्पते॰ काष्ठानि निक्षिपेत् चत्वारि शृंगागौतमो॰
वामदेवोग्निस्त्रिष्टुप् अग्निमूर्त्तिध्याने वि॰ ॐ चत्वारिशृंगात्रयो॰ अथ गायत्रीपीठं नवग्रहपीठप्रका
रावहन्यंते ईशानकोणे हस्तपरिमितां वेदिद्वयं कुर्यात् अथ पीठप्रकारः सर्वतोभद्रमध्यस्थमष्टपत्रद
लं तथा षट्कोणं तत्र ह्रींकारं त्रिकोणं विलिखेद्बुधः एवं यंत्रं विलिख्य गणपत्यादिवाद्ययंत्रे चतुष्ष
ष्टिपूजयेन्नित्यवत् अथ नवग्रहपूजाविधिः आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप् सूर्यावाहने वि॰ ॐ
आकृष्णेन रजसा॰ ॐ भूर्भुवः स्वः ग्रहपीठमध्ये वर्तुले द्वादशांगुले मंडले कलिंगदेशोद्भवं काश्यपगो
त्रं रक्तवर्णं सूर्यं प्राङ्मुखमौहयामि पूजयामि नमः अग्निं दूतं कांत्वो मेधातिथिरग्निर्गायत्री अग्न्यावाह
वा

नेवि० ॐ अग्निं दूतं पु० ॐ भूर्भुवः स्वः सूर्य दक्षिणपार्श्वे अग्निं आ० त्र्यम्बकस्य वसिष्ठो रुद्रमनुष्टुप् रुद्रावा

हनेवि० ॐ त्र्यम्बकं यजा० ॐ भूर्भु सूर्यवामपार्श्वे रुद्रं आ० आप्यायस्व गोतमः सोमो गायत्री सोमावाह

नेवि० ॐ आप्यायस्व समे० ॐ भूर्भु० आग्नेयां दिशि चतुरस्रे चतुर्विंशत्यङ्गुले मण्डले यमुनादेशोद्भव आत्रे

यसगोत्र श्वेतवर्ण सोमं प्रत्य ध्रुवं आ० अस्य मे काण्वो मेधातिथिरापोनुष्टुप् अपावाहनेवि० ॐ अस्म

मे सो० मे षजीः ॐ भू० सोमदक्षिणपार्श्वे अद्भ्यो नमः अपः आ० गौरीर्मिमाय इति अौचथ्यो दीर्घतमा उमा

जगती गौर्यावाहनेवि० ॐ गौरीर्मिमाय० ॐ भू० सोमवामपार्श्वे उमामावा० अग्निर्मूर्द्धा विरूपो ङ्गारको

गायत्री अङ्गारकावाहनेवि० ॐ अग्निर्मूर्द्धा० ॐ भू० दक्षिणे त्रिकोणमंडले अवन्तिदेशस्यं भारद्वाजसगो

८३ त्रंरक्तवर्णांभौमंदक्षिणाभिमुखमावा॰ स्योनामेधातिथिर्भूमिर्गायत्री भूम्यावा॰ ॐस्योनापृथिवि॰ भौमद

क्षिणपार्श्वेभूमिंप्रा॰ यदक्रंदऋषिर्वध्यारीर्घतमास्कंदस्त्रिष्टुप् स्कंदावाहनेवि॰ ॐयदक्रंदप्रथम॰ ॐभू

राम ॰भौमपार्श्वेस्कंदंप्रा॰ उद्बुध्यध्वंसौम्योबुधस्त्रिष्टुप् बुधावाहनेवि॰ ॐउद्बुध्यध्वंसम॰ ॐभू॰ईशान्यांबा

93 णाकारमंडलेमागधदेशाख्यंप्रात्रेयसगोत्रंपीनवर्णांउदङ्मुखंप्रावा॰ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री

विष्ण्वावा॰ ॐइदंविष्णुर्विच॰ ॐभू॰बुधदक्षिणपार्श्वेविष्णुंप्रा॰ सहस्रशीर्षानारायणःपुरुषोनुष्टुप् ना

रायणावाहनेवि॰ ॐसहस्रशीर्षापुरुषः ॐभू॰बुधवामपार्श्वेनारायणंप्रा॰ बृहस्पतेगृत्समदो बृहस्पति

स्त्रिष्टुप् बृहस्पत्यावा॰ ॐबृहस्पतेअतियदर्यो॰ ॐभू॰उदीच्यांदीर्घचतुरस्रमंडलेसिंधुदेशाख्यंआंगिरस॰

राम

गोत्रंपीतवर्णंबृहस्पतिमावा० इंद्रंवोमधुच्छंदाइंद्रोगायत्री इंद्रावाहनेवि० ॐइंद्रंवोविश्वतस्परि० ॐभू० बृह।
स्पतिंदक्षिणपार्श्वेइंद्रंप्रा० ब्रह्मजज्ञानंगोतमोवामदेवोब्रह्मात्रिष्टुप्ब्रह्मावाहनेवि० ॐब्रह्मजज्ञानंप्र० ॐ
भू० बृहस्पतिवामपार्श्वेब्रह्माणंप्रा० शुक्रःपाराशरःशुक्रोद्विपदाविराट्शुक्रमा० ॐशुक्रःशुशुक्वां० ॐभू०
२ प्राच्यांपंचकोणमंडलेभोजकटदेशस्थंभार्गवसगोत्रंश्वेतवर्णंशुक्रंप्रांजुलिंप्रा० इंद्राणीवृषाकपिरिंद्रा
णीपंक्तिः इंद्राण्यावाहनेवि० ॐइंद्राणीमासुना० ॐभू० शुक्रदक्षिणपार्श्वेइंद्राणींप्रा० इंद्रंवोमधुच्छंदा
इंद्रोगायत्री इंद्रमा० ॐइंद्रंवोविश्वतःस्परि० ॐभू० शुक्रवामपार्श्वेइंद्रंप्रा० शमग्निरिति विदिशाग्निहस्मि
रु यग्निमावाहनेवि० ॐशमग्निरग्निभिः ॐभू० प्रतीच्यांदिशिधनुषाकारेव्यंगुलेमंडलेसौराष्ट्रदेशोद्भ

९४ वं काश्यपसगोत्रं लोहितवर्णं शनिं प्रत्यङ्मुखमावा॰ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् प्रजापत्या
वा॰ ॐ प्रजापते न त्वदे॰ ॐ भूः॰ शनिदक्षिणपार्श्वे प्रजापतिं॰ आवा॰ यमाय सोमं यमयमोऽनुष्टुप् यमावाह
नेवि॰ ॐ यमाय सोमं॰ ॐ भूः॰ शनिवामपार्श्वे यमं॰ आ॰ कया नो वामदेवो राहुर्गायत्री राहु आवाहने वि॰ ॐ॰
कया नश्चित्र॰ आभुव॰ ॐ भूः॰ नैरृत्ये शूर्पाकारमण्डले वैराटिदेशाख्यं पैठीनसगोत्रं कृष्णवर्णं राहुं दक्षिणा
भिमुखं॰ आवा॰ आयं गौः सार्पराज्ञिः सर्पा गायत्री सर्पावा॰ ॐ आयं गौः पृश्नि॰ ॐ भूः॰ राहुदक्षिणभागे
सर्पान्॰ आ॰ मो षु णो घोरः कण्वः कालो गायत्री कालावा॰ ॐ मो षु णः परापरा॰ ॐ भूः॰ राहुवामपार्श्वे का
लमावाह॰ केतुं मधुच्छन्दाः केतुर्गायत्री केत्वावाहने वि॰ ॐ केतुं कृण्वन्न॰ ॐ भूः॰ वायव्ये ध्वजाकारमण्डले॰ अं

तर्वेदिस्य जैमिनसगोत्रं धूम्रवर्णं केतुं दक्षिणाभिमुखं आवाहयामि स्थापयामि पूजयामि नमः ब्रह्मजज्ञा
नं गौतमो वामदेवो ब्रह्मा त्रिष्टुप् ब्रह्मावाहने वि० ॐ ब्रह्मजज्ञानं प्र० ॐ भू० केतुदक्षिणपार्श्वे ब्रह्माणमावा०
उषो वाजं सकं एवं श्रित्रगुप्तो बृहती चित्रगुप्तावाहने वि० ॐ उषो वाजं हि वंस्व० ॐ भू० केतुवामपार्श्वे चित्रगु
प्तम्मा० ततः इन्द्रादिलोकपालानावाहयेत् इंद्रं वो मधुच्छन्दा इन्द्रो गायत्री इन्द्रावाहने वि० ॐ इंद्रं वो विश्व० ॐ
भू० इन्द्रं० आ० अग्निं दूतं कण्वो मेधातिथिरग्निर्गायत्री यमाय सोमं यमैमो नुष्टुप् असकं चनेति मंत्रस्य --- र प
------- त्वन्नो अग्ने इत्यस्य ------------- तव वायवि विश्वामित्रो वायुर्गायत्री सोमाये
नुं गौतमः सोमस्त्रिष्टुप् तमीशानं वामदेव ईशानो जगती अप्यन्तर्दैवतामावाहयेत् सूर्यस्य० आसमंतात्

८५ पत्याद्दिदेवतास्थापयेन गणानांत्वा गृत्समदो गणाधिपतिर्जगती जातवेदसे कश्यपो दुर्गा त्रिष्टुप् क्षेत्रस्य ॥
वामदेवः क्षेत्राधिपतिरनुष्टुप् वास्तोष्पते गृत्समदो वास्तोष्पतिस्त्रिष्टुप् त्र्यंबकं वसिष्ठो रुद्रो नुष्टुप् गंधद्वा ॥
रामानंदः कर्दमः श्रीरनुष्टुप् त्यस्य — — — — अभयंकरोनुष्टुप् परंमृत्यो संकुसुको मृत्यु रोगो त्रिष्टुप् अ ॥
धपश्यस्य — — अधरलोकपालोनुष्टुप् ऊर्ध्वऊषुण — — — — ऊर्ध्वलोकपालोनुष्टुप् अंतरिक्षं नील्यस्य ॥
— — — अंतरिक्षो गायत्री कुलदेव्यै नमः पूर्वकं इष्टदेवतामावाह्य एवं पीठपूजां कृत्वा स्वस्थाने उपवेशये ।
त् अथाग्निध्यानं अथाग्निमूर्तिं वक्ष्यामि सर्वाभीष्टप्रदायकं येकदेहं द्विशीर्षं च जटामुकुटमंडितं रुद्रं ।
त्रिस्वर्णाविपुष्पं शांकशाकलान्वितं चतुःश्रोत्रं द्विनासं च षड्हृत्पिंगलप्रभं आस्यहृदयस्कतामां वक्ष सप्तजिह्वास

मन्वितं दक्षिणास्ये चतुर्जिह्वा लिखा वै वामवक्त्रेग प्रसन्नं स्मितं शांतं सप्तहस्तसमन्वितं दक्षिणे च च
तुर्हस्तं वामभागे त्रिहस्तकं स्त्रुक्स्त्रुवौ शक्तिमिध्मं च धारयं दक्षिणैर्भुजैः धारयं तोमरं वामे व्यजनं घृतपात्र
कं त्रिमेखलं त्रिपादं च मेषारूढं वरप्रदं यज्ञसूत्रधरं सौम्यं सर्वाभरणभूषितं रक्तांवरधरं देवं रक्तमालावि
भूषितं रक्तचन्दनलिप्तांगं ज्वालाकोटिसमप्रभं स्वाहां च दक्षिणे पार्श्वे देवीं वामे स्वधां तथा एवं संचिन्त्य
मनसा वह्निमध्ये नमाहूयेत् ॐ एषहि देवः प्र॰ शांडिल्यगोत्रा वैश्वानर मेषारूढ वरप्रद रक्तध्वज रक्तपता
काशोभिता प्राङ्मुखो देव मम सन्मुखो भव ॥ आचम्य प्राणानायम्य देशकालौ स्मृत्वा गायत्रीपुरश्चरणांग
भूतान्वाधानं करिष्ये तत्र देवता परिग्रहार्थमन्वाधानं करिष्ये अस्मिन्नन्वाहिते ग्नौ जातवेदसमग्निमिध्मे

९६ नप्रजापतिंप्रजापतिंचाघारदेवताः आज्येन अग्नीषोमौ चक्षुषी आज्येनात्रप्रधाने गायत्र्याप्रधानदेव।
ताः कल्पोक्तद्रव्येणानर्दंगत्वेनात्रप्रधाने अग्निंसवितारंरुद्रं आपः सोममुमांभूमिमगारकंस्कंदंविष्णुं॥
96 धंनारायणंइंद्रंबृहस्पतिंब्रह्माणंइंद्राणींशुक्रमिंद्रंप्रजापतिंशनिंयमंसर्पाराहुंकालंब्रह्माणंकेतुंचित्र।
गुप्तंइंद्राग्नेलोकपालान्सगणानपत्यादित्रयोदशदेवताः यथालाभद्रव्येणपोषणत्विष्टकृतमग्निंइध्म।
सन्नहनेनरुद्रं अथास्तमग्निंदेवान्विष्णुं अग्निंवायुंसूर्यंप्रजापतिंचएताः प्रायश्चित्तदेवताः आज्यद्रव्ये।
णविश्वान्देवानसंस्रावेण अंगदेवताः प्रधानदेवताः सर्वाः संनिहिताः सन्तुएवंसांगोपांगेनकर्मणासद्यो
यक्ष्येव्याहृतीनांपरमेष्ठीप्रजापतिः प्रजापतिर्बृहती अन्वाधानसमिद्धोमेवि॰ ॐ भूर्भुवःस्वःस्वाहाप्रजापत।

यद्दत्तमम पाणिनासोदकेनाग्निसमंतात्परिमार्जनं तत्समोहनमन्त्रेषं जपतवचनं तथा दिक्षुः सर्वाउ
दकसंस्थाप्याप्यादिषु परिस्तृतिः काचित्स्फत्रातोदर्भानात्तीर्यपरिषिंचति पर्यूहः पर्षकौल्लस्यसर्वत
स्त्रिस्त्रिरंभसः दर्भैवृत्तानीदद्वेपात्राण्यपि चसाधयेत् तत्क्रमोभगवानाहश्लोकेनैकेनवृत्तिकृत् प्रोक्षणी ।
स्रुवमासाद्यचमसंचाज्यभाजनं इध्माबर्हिरिदं प्रोक्ष्याज्यहोमेष्वनुक्रमात् उक्तानेप्रोक्षणार्थ्योपोनिनयेत्स
पवित्रके पवित्राभ्यांत्रिरुत्पूतेत्रिः प्रोक्ष्योर्ध्वविलानितु विसृज्येध्मंचचमसंसपवित्रमतःपरं पूरयित्वाज ।
लस्तत्रगंधपुष्पाद्यविपेत् निरस्तः परावसुरित्यमहमर्वावसोःसदनेसीदामि अस्मिन् कर्मणिब्रह्मत्वंकुरु
ब्रह्मणेनमः ततः तेनपवित्रे आज्यपात्रेनिधाय अन्यैर्दर्भैराच्छादयेत् दर्भैः प्रच्छादयेत्पात्रं पूर्णपात्रेन दुग्ध्य

त्रै

९७ ते ॰अपो छेदनं ततो ऽङ्गारान् स्थापयित्वा तत्र हुतं आधिश्रित्य सर्वथाल्यां दर्भाग्रद्वयं प्रस्यति तेनैव ज्वलितेनाज्यं च त्रिः
पर्यग्निकरोत्यथ कर्षं निवोदगुद्वास्य अङ्गारान् अतिसृज्य च सवितुष्ट्वा हिरण्यपाणिः सविता पुरउत्सिक्तः आज्य
स्यान्यवे नेवि॰ ॐ सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः इति प्रागुत्पुनाति सकृन्मं
त्रेण द्विस्तूष्णीं पवित्रे प्रोक्ष्याग्नौ प्रहरेत् ॐ स्कन्दाय स्वाहा स्कन्दायेदं॰ अथ उपस्थाप्य अनलात्प्रत्यगाल्लीषर्थे
वर्हिष्याज्यं निधाय च प्रताप्य तत्कुशोर्द्वी स्रुवौ द्वर्वीं निधाय च स्रुवसंमार्जनं कृत्वा पश्चात् स्रुच्यौ च मार्ज
येत् स्रुवस्य बिलमग्नेस्तप्तमप्यान्तमग्रतः आरभ्य पृष्ठतो यावदुपरिष्टाद्बिलं भवेत् कुशानां मूलतो दं
उमकैकं त्रिर्मार्जीत वै प्रोक्ष्य प्रताप्य चासाद्य वर्हिष्युत्तरतो घृतात् तान् कुशान् तत्संमार्गान् प्रोक्ष्याग्नौ प्रहरेद् य

97

विश्वानि न इत्यस्य नयोर्वस्त्रकश्रृतोग्निस्त्रिष्टुप् ऽग्न्यर्च्चने वि० ॐ विश्वानि नो दुर्गहा० ऋ० क० ३३ ध्यायनेध्मम्
लंकृत्य स्मानं चालंकृत्य ऽग्रयं न इत्यस्य वत्सश्रृतो जातवेदाग्निस्त्रिष्टुप् इध्माधाने वि० ॐ ऽग्रयं न इध्म ऽआत्मा
० जातवेदसेग्नये इदं ऽआरभ्य दिशि माग्नेयीमाज्यधारामस्रौंहरेत् नैऋती दिशिमारभ्य ईशानीं पूर्ववदुनेत् ॐ
ऽग्नये स्वाहा ऽग्नय० ॐ सोमाय स्वाहा सोमायेदं० ऽथ प्रधानहोमं कुर्यात् ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरे
ण्यं ॐ भर्गो देवस्य धीमहि ॐ धियो यो नः प्रचोदयात् ॐ स्वाहा श्रीगायत्री इदं० एवं विधानेन दशांशहवनं कु
र्यात् पूर्णाहुतिदिने नवग्रहहोमं कुर्यात् इष्टदेवतादि प्रस्तुविघ्नांतहोमं संपाद्य पश्चाद्बलिदानं कुर्यात् पीठ
पूजाविधानादि पात्रासादनसंरहाणं ऽशक्ताभावे पूर्णाहुतिदिने पुनः ऽन्वाधानादि पीठपूजादिकं संपाद

९८ येत् प्रारंभदिने अग्निमुखमात्रं कुर्यात् पुनः पात्रादि विसर्जयेत् संस्काराग्निं संरक्षयेत् होमस्य प्रारंभदि
नादारभ्य समाप्तिदिन पर्यंतं नित्यं चत्वारिंशं गेति ध्यात्वा परिसमूह्य परिस्तीर्य पर्युक्ष्य विश्वानि न इति सं
पूज्य होमं कुर्यात् अथ पूर्णाहुतिदिन प्रकारो वक्ष्यते पूजा स्विष्टकृद्वा हुत्वा बलिं पूर्णाहुतिं तथा श्रेयः सं
पाद्यदानं च ब्राह्मणान् भोजयेत् ततः स्वगुरोश्च ततः पूज्य भोजनाच्छादनादिभिः संतोष्य गुरुयत्नेन अनुज्ञा
च पुरस्तं पीठादुत्तरभागे तु गुरुं संपूज्य यत्नतः तोषयेद्बलिदानेन तद्दूरेऽत्याल ततः परं दिक्पालानपि संपू
ज्य तोषयेद्बलिदानतः गणेशादिबलिं दद्यात् नवदिने तु नवग्रहान् वेदमातुर्बलिं दद्यात् महाबलिं ततः परं
अथ बलिदानप्रकारः इंद्रं वो मधुच्छंदा इंद्रो गायत्री इंद्रप्रीत्यर्थे बलिदाने वि० ॐ इंद्रं वो विश्व० इंद्राय सांग

98

यस परिवाराय सायुधाय सवाहनाय सशक्तिकाय गायत्रीपार्श्वदाय एष सदीपमाषभक्तबलिं समर्पयामि ।
भो ईंद्र मम सहकुटुंबस्य आयुरारोग्यहेमकर्त्री शांतिकर्त्री निर्विघ्नकर्त्री भव ॐ अग्निं दूतं वृ० अग्नये सांगा
यस० ॐ यमाय सोमं० यमाय सांगाय० ॐ मोषुणः परापरा० निरृतये सांगा० ॐ त्वन्नो अग्ने वरुणस्य० वरु
णाय सांगाय० ॐ तव वायवृत० वायवे सांगाय० ॐ सोमो धेनुं सोमो० सोमाय सांगाय० ॐ तमीशानं जगत० ई
शानाय सांगाय० ततो गृहवेधासमंनाम्नः बलिं दद्यात् तत्र आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप् सूर्यप्री
त्यर्थं बलिदाने वि० ॐ आकृष्णेन रजसा० आदित्याय सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्ति-
काय गायत्रीपार्श्वदाय अग्निरुद्राधिदेवताप्रत्यधिदेवतासहिताय एष सदीपमाषभक्तबलिं गृहाण भो

सूर्यममसहकुटुंबस्य॰आयुःकर्त्ता क्षेमकर्त्ता शांतिकर्त्ता पुष्टिकर्त्ता निर्विघ्नकर्त्ता भव ॐ॰आप्यायस्वसमे॰सोमा।
यसांगाय॰आप उमा॰अधिदेवताप्रत्यधिदेवतासहिताय॰सोमममममसहकुटुंबस्य॰ततो दक्षिणे ॐ॰अग्नि।।
मूर्द्धा दिवः क॰भौमायसांगाय॰भूमिस्कंद॰अधिदेवताप्रत्यधिदेवतासहि॰ततः ईशान्ये ॐ उद्बुध्यध्वंसम॰।
बुधायविष्णुनारायणाधिदेवताप्रत्यधिदेवतासहि॰ततो त्तरे ॐ बृहस्पते॰अति॰बृहस्पतये इंद्रब्रह्माधि।
देवताप्रत्य॰ततः पूर्वे ॐ शुक्रः॰शुक्रं॰शुक्राय इंद्राणी इ॰अधिप्रत्यधिदेवतास॰ततः पश्चिमे ॐ शम
ग्निरग्निभिः॰शनैश्चरायप्रजापतियमाधिप्रत्यधि॰ततो नैर्ऋत्ये ॐ कयानश्चित्र॰आ॰राहवे सर्पकाला
धिप्रत्यधिदे॰ततो वायव्ये ॐ केतुंकृण्वन्न केतवे॰केतवे ब्रह्मचित्रगुप्ताधिप्रत्यधिदे॰ततो गणपत्यादिदे।

ॐ वास्तोष्पते प्रतिजानी॰ वास्तोष्पतये सांगाय॰ ॐ त्र्यंबकं य॰ त्र्यंबकाय सांगा॰ ॐ गंधद्वारां दुरा॰ श्रियै
लिं दद्यात् ॐ गणानां त्वा ग॰ विनायकाय सांगाय सवाहनाय सायुधाय सशक्तिकाय गायत्रीपार्श्व॰
दाय एष दीपमाषमत्स्यबलिं गृहाण भो विनायक मम कुटुंबस्य आयुःकर्त्ता भव॰ ॐ जातवेदसे॰ दुर्गा॰
यै॰ ॐ यत इंद्र भयामहे॰ अभयंकराय सांगाय स॰ ॐ परं मृत्यो॰ अनु परे॰ मृत्युरोगाभ्यां सांगाभ्यां॰ ॐ प्र
धः पद्यस्व मोपरि॰ अधोलोकपालाय॰ ॐ ऊर्ध्व ऊषुणः ऊतये॰ ऊर्ध्वलोकपालाय सांगाय॰ ॐ॰ अंतरिक्षं
तितं जने॰ अंतरिक्षलोकपालाय॰ ॐ श्रीकुलदेव्यै नमः श्रीकुलदेवतायै सांगायै॰ स्मरेत् नामपूर्वकं ग
णगायत्रीपीठबलिरुच्यते॰ मंत्रांतरेण गणपत्यादिबलिचतुष्टयं दद्यात् दध्यक्तं पयसाक्तं वा घृताक्तं च त
था पिबा आहारपरिमाणेन मम धनं तु न दद्यो बलिं विप्राय दानं वेदवेदांगपारगे नैवं पानगुणेषु ।

श्रियै स्तं नाहे

१०० एवं जायते वाक्सरस्वती समंत्रं च वलिं दद्यात् शिरो व्याहृतिपूर्वकं त्रिवारं प्रोक्षणं पूर्ववद् ध्यानं नामपूर्वकं
गायत्र्या विश्वामित्र ऋषिः सविता देवता गायत्री छन्दः श्रीगायत्रीप्रीत्यर्थं वलिदाने वि० ॐ भूर्भुवः स्वः ० श्री
गायत्र्यै सांगायै सपरिवारायै सायुधायै सवाहनायै सशक्तिकायै एष दध्यन्नकवलिं गृहाण भो गायत्री मम
मम कुटुम्बस्य आयुःकर्त्री क्षेमकर्त्री शान्तिकर्त्री पुष्टिकर्त्री तुष्टिकर्त्री निर्विघ्नकर्त्री भव ॥ अथ क्षेत्रपा-
लवलिः ततो गृहान्निर्गत्य ततो महावलिं कुंकुमादिरक्तपुष्पालंकृतं मरीचसफलं सताम्बूलं सदक्षि-
णाकं क्षेत्रपालाय दद्यात् क्षेत्रस्य वामदेवः क्षेत्रपालानुष्टुप् क्षेत्रपालप्रीत्यर्थं वलिदाने वि० ॐ क्षेत्रस्य प-
तिना० क्षेत्रपालाय भूतप्रेतपिशाचब्रह्मराक्षसशाकिनीडाकिनीवेतालादि सपरिवाराय सांगाय सवाह

नायमायुधायसशक्तिकाय ० षमदीपमाषमक्तवलिंगहाणा मोहैत्रपालममसहकुटुम्बस्य आयुः

कर्त्रीः भव ततः पादपाणीप्रक्षाल्याचांत पाणीनाप पिबीत्यनेनमंत्रेण आसमंताद्धंसोहम ततः

स्विष्टकृतादिकं कुर्यात यदस्यकर्मणो इत्यस्य हिरण्यगर्भऋषिः त्रिष्टुप्छन्दः अग्निस्विष्टकृद्धोमेवि०

ॐ यदस्यकर्मणो० स्वाहा अग्नये स्विष्टकृते इदं० त्रिसंधानेन ॐ रुद्राय पशुपतये स्वाहा रुद्राय पशुपतये इदं०

ॐ विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं० अयाश्चेत्यादि प्रकिवेणास मन्त्रेणाज्याहुतीर्जुहुयात् अया

श्चेत्यस्य विमदऋषिः अग्निर्देवता पंक्तिश्छन्दः सर्वप्रायश्चित्ताज्यहोमे वि० ॐ अयाश्चाग्ने० स्वाहा अ

ग्नये अयस इदं० अतो देवा इति द्वयोः कण्वमेधातिथि ऋषिः आद्यादेवो देवता द्वितीयाया विष्णुर्देवता गाय

१०१ ३ो छन्दः प्रायश्चित्ताज्यहोमे वि० ॐ प्रातो देवा अवंतु० स्वाहा देवेभ्य इदं० ॐ इदं विष्णुर्विच० स्वाहा विष्णव इदं०
ॐ भूः स्वाहा अग्नय इ० ॐ भुवः स्वाहा वायव० ॐ स्वः स्वाहा सूर्याय इदं० ॐ भूर्भुवः स्वः स्वाहा प्रजापतय० अ
ज्ञातमिति मंत्रस्य हिरण्यगर्भोऽग्निस्त्रिष्टुप् ज्ञाताज्ञातदोषपरिहारार्थे प्रायश्चित्ताज्यहोमे वि० ॐ अ
101 ज्ञातातं यदज्ञातं० स्वाहा अग्नय० ॐ पुरुषस० अग्नय इदं० यत्पाकत्रेत्यस्य वसिष्ठ ऋषिरग्निर्विराट् न्यूनाति
रिक्तपरिपूर्णार्थमाज्यहोमे वि० ॐ य अग्नयस्पाकत्रा मनसा० स्वाहा इदं० मंत्रविपर्यासे तंत्रविपर्यासे का
लविपर्यासे कर्मविपर्यासे अवदानविपर्यासे स्वरवर्णलोपप्रायश्चित्तार्थं प्रायश्चित्तं करिष्ये यद्वो देवाभि
तपाम रुद्रस्त्रिष्टुप् मंत्रविपर्यासादि प्रायश्चित्ताज्यहोमे वि० ॐ यद्वो देवा अतिपात० स्वाहा मरुद्भ्य इदं० ।

व्याहृतीनां प्रत्येकं विश्वामित्रजमदग्निभरद्वाजगौतमः ॥ अग्निर्वायुः सूर्यः प्रजापतिर्देवता देवीगायत्र्यु

ष्णिगनुष्टुब्बृहतीपंक्तिश्छंदांसि व्याहृतिहोमे वि० ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा ॐ भूर्भुवः स्वः स्वाहा ॥ अ

थ पूर्णाहुतिप्रकारो वस्त्रेण कंचुकीसहपट्टकूलादिकं पात्रांतरे गृहीत्वा नानासौभाग्यादिद्रं वेष्टितं श्रीफ

लादिसहपंचफलैः पात्रं पूरयेत् तदभावे पीतवस्त्रादिकं श्रीफले कंचुकीसहितं देव्याभिमुखेस्तिष्ठन्करकम

वेणापूरितमाज्यं द्वादशवारं च श्रीफलं च तत्पोषितं वसोर्द्धारादिकं दद्यात् ध्यानमंत्रार्थचिंतनं ॥ अथ मन्त्रः समु

द्राद्रूर्मिरित्येकादशर्चस्य सूक्तस्य गौतमो वामदेव ॥ आपस्त्रिष्टुप् ॥ अंत्या जगती पूर्णाहुतिहोमे वि० ॐ समुद्रादूर्मि

० ११ मूर्धानं बार्हस्पत्यो भरद्वाजोग्निस्त्रिष्टुप् पूर्णाहु० ॐ मूर्धानं दिवो० १ पुनस्त्वा हद्राग्निस्त्रिष्टुप् पूर्णाहु० ॐ पुन

 त्वादित्यान्रुद्रावसवःसमिंधतांपुनर्ब्रह्माणोवसुनीथयज्ञैः घृतेनत्वंतन्वंवर्धयस्वसत्यासंतुयज०माः पू

 र्णादर्विविश्वेदेवाशतक्रतुरनुष्टुप् पूर्णाहु० ॐ पूर्णादर्विपरा० १ सप्तते ऽग्नेसप्तवानग्निर्जगती पूर्णाहु०

ॐ सप्तते ऽग्नेसमिधःसप्तजिह्वाःसप्तऋषयःसप्तधामप्रियाणि सप्तहोत्राःसप्तधात्वायजंतिसप्तयो

 नीरापृणस्वाघृतेनस्वाहाकारेणसर्वंक्षिपेत् ऽअग्नयेवैश्वानरायवसुरुद्रादित्येभ्यःशतक्रतवेसप्तते

ऽग्ने ऽअग्न्यइदंनममेतित्यजेत् ऽअथवसोर्धारा ततःवह्नेरुपरिलंबमानंविधिनामौदुंबरींकोटरांबाहु

मात्रप्रमाणांस्रुचिंवागोमुखसदृशांपूर्वाग्रांदक्षिणोत्तरकाष्ठेनिधायतदुपरिशंखेलाविधानेननिर्मल

घृतपूरितताम्रमृदाकुंभंनिधायतन्मूलेयवमात्रछिद्रेण ऽग्राज्यंविमुच्य ऽअग्नेरुपरिसंततधारा ।

पातयेत् तत्रमन्त्रः ॰अग्निमीलेनवानांमधुछन्दाग्निर्गायत्री वसोर्धारायांवि॰ ॐ॰अग्निमीलेपु
रो॰९ विश्वानुकमित्येकर्चस्यदीर्घतमाविश्वस्त्रिष्टुप् वसोर्द्धा॰ ॐ विश्वानुकं॰१ ॰आनेपिनरिति
पंचदशर्चस्यसूक्तस्यगृत्समदोऽग्निस्त्रिष्टुप् वसोर्द्धा॰ ॐ॰आनेपिनर्मरुतांस्त्व॰१५ स्वादिष्ठयेतिदश
र्चस्यसूक्तस्यमधुछन्दाः पवमानसोमोगायत्री वसोर्द्धा॰ ॐ स्वादिष्ठया॰१० महावैश्वानरसाम्नोवैश्वा
नरोवैश्वानरोबृहती वसोर्द्धारायांवि॰ ॐ — — — — — — — — — — — — — एवंवसोर्धारांविधायपश्चा॰
त्तेनपूर्णपात्रविमोकादिकुर्यात् बर्हिषिपूर्णपात्रंनिनयेत्प्रादेशमात्रेः पुष्पितलेषुश्वालित्यंतं कु॰
त्वापरिस्तरणानिविसृज्यपरिसमुह्यपर्युक्ष्यविश्वानिनदुस्त्येनेनार्चयित्वाश्रीयज्ञेश्वरायगंधाष्ट

१०३ पचारं दत्वाऽग्नेन्वन्नेः शल्यपस्थाय ॰ अग्नेनयेति सूक्तेन प्रदक्षिणां कृत्वा मानस्तोके त्यादिना विभूतिं धृ
त्वा ॐ च मे ति प्रार्थयेत् ततः साक्षतोदकं गृहीत्वा यस्य स्मृत्येत्यनेन ॰ अनेन गायत्री पुरश्चरणांग
होमेन भगवान् श्रीपरमेश्वरः प्रीयतामिति वदेत् ततो यजमानः ॰ आचार्यर्त्विग्जापकेभ्यः श्रे
यः संपादनं संगृह्य तेभ्यो यथाशक्ति दक्षिणां दत्वा गोभूमितिलहिरण्यादि यथाविभवं दत्वा ॰ चार्यो यवपीठं नि
वेश्य ग्रहकलशोदकं वास्तुकलशोदकं गायत्रीकलशोदकं गृहीत्वा वैदिकमंत्रैः पुराणमंत्रैः सपुत्रः
सकुटुम्बः सपत्नीको यजमानमभिषिंच्य गच्छ गच्छेति ॰ अग्निं विसृज्य यांतु देवगणा ॰ अस्मात्समिदद्ये
ति पीठानि विसृज्य तर्पयेत् ततः निर्माल्योदकं पात्रांतरे गृहीत्वा तत्र गंधपुष्पाक्षतानि निक्षिप्य ब्रह्मांडोदरे

१०४ तीर्थान्यावाह्य पूर्ववध्यानमुद्रादियंत्रलेखनादिकं कृत्वा होमदशांशेन तर्पणं कुर्यात् ओं भूर्भुवः स्वः
ओं तत्सवितुर्वरेण्यं भर्गो॰ यात् ओं श्रीगायत्रीं तर्पयामि जपदशांशतो होमस्तद्दशांशेन तर्पणं
मार्जनं तद्दशांशेन ब्राह्मणान् भोजयेत्था इति पंचांगजपः अंगहीनादिकं कर्मजपोद्विगुणमुच्यते ।
104 तर्पणं मार्जनं चैव भोजनं च चतुर्गुणमिति इति विश्वामित्रकल्पे नित्यनैमित्तिकादि गायत्रीपुरश्चर
णविधानं समाप्तं श्रीगायत्र्यार्पणमस्तु ❖ मिति फाल्गुण वदि ३ गुणाह्निरत्नभूवर्षे मकरा
। कें भगुवासरे इतिशुभमस्तु सर्वजगताम्॥

भूयात्

हर्तुमिच्छति यः पापी तस्य वन्तक्षयो भवेत्

राम